दैनिकम् ई-संस्कृतवार्तापत्रम्

हिमसंस्कृतवार्ता

पञ्चाङ्गम्
वि.सं. २०८३,
कलियुगाब्धः ५१२७ हेमन्त-ऋतुः
सूर्यः दक्षिणायनम् कार्तिकशुक्लद्वितीया
कार्तिक 26 प्रविष्टांशः मङ्गलमयः भवेत्

■ पृष्ठ-14 ■ वर्ष-6 ■ अङ्क-15 | 1 | नवम्बर 09, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

2 भारतं यूरोपीयसंघः च व्यापारम् आर्थिकसहयोगं च सुदृढीकरणाय नवदेहली-नगरे उपवेशनम् आयोजितवन्तौ

4 सम्पूर्णानन्द-संस्कृत-विश्वविद्यालय-वाराणस्याः कुलपतिना प्रो. बिहारीलालशर्मणा सह डॉ. मनोजशैलेन विहितं शिष्टाचार-मेलनम्

13 भ्रातृद्वितीया पर्वसमीक्षा डा.विमलेशः

विश्व-बैंक-संस्थया भारतस्य जल-प्रबन्धन-सफलता भृशं श्लाघिता, जल-जीवनाभियान-प्रतिमानस्य वैश्विक-स्तरे आदान-प्रदानाय विहितञ्च समाह्वानम्



भारतस्य जल-प्रबन्धन-प्रकल्पाः विकासशील-देशानां कृते आदर्श-प्रतिमानरूपेण समुद्भूताः । विश्व-बैङ्क इत्यस्य जल-विषयक-वैश्विक-निदेशकेन सरोज कुमार-झा इत्यनेन भारतस्य एषा प्रगतिः सफलता-गाथारूपेण वर्णिता। आगामिनः षड्विंशत्यधिक-द्विसहस्रतमवर्षस्य संयुक्तराष्ट्र-जल-सम्मेलनात् पूर्वं भाषमाणः श्रीझा जल-जीवन-अभियानम्, नमामि गङ्गे, स्वच्छ-भारताभियानम् इत्यादीनां राष्ट्रिय-प्रकल्पानां भृशं प्रशंसां कृतवान्। सः अवोचत् यत् जल-जीवनाभियानेन सप्तभ्यः वर्षेभ्यः अपि अल्पकाले अष्टशत-मिलियनपरिमितेभ्यः जनेभ्यः विशुद्ध-पेयजलस्य सुविधा उपकल्पिता। सः गङ्गायाः प्रायशः नवशत-जलबन्धानां सुरक्षा-संवर्धन-कार्याणि च अपि प्राशंसत्। श्रीझा अबूधाबी-नगरे आगामि-दिसम्बर-मासस्य अष्टदिनाङ्कात् दशदिनाङ्क यावत् आयोज्यमाने विश्व-जल-सम्मेलने भारताय स्व-अनुभवान् वैश्विकस्तरे वितरितुम् आग्रहम् अकरोत्।

नवदेहल्यां नमो-यमुना-रिवर-सफारी इति नौका-विहार-सेवा समारब्धा, सोनिया-विहार-जगतपुरयोः मध्ये षट्-किलोमीटरमिते दीर्घ यमुना-तटे सञ्चालिष्यते इयं सेवा



केन्द्रीय-पत्तन-पोत-परिवहन-जलमार्ग-मन्त्री सर्वानन्द सोनोवालः नवदेहल्यां यमुना-नद्यां मनोह्लादिन्याः नौका-पर्यटन-सेवायाः शुभारम्भम् अकरोत्। नमो-यमुना-रिवर-सफारी इति नाम्ना इयं क्रूज़-सेवा सोनिया-विहार-जगतपुर-क्षेत्रयोः मध्ये षट्-किलोमीटर-दीर्घ यमुनानद्यां सञ्चलिष्यति। अत्रावसरे सम्बोधयन् श्रीसोनोवालः अवोचत् यत् दिल्ली-सर्वकारः यमुनायाः निर्मलीकरणाय अथ च अस्याः जलं जन-जीवनाय हितकरं कर्तुं पूर्णतया कटिबद्धः वर्तते। मुख्यमन्त्री रेखा-गुप्ता अवोचत् यत् देहल्याः नागरिकाः प्रथमतया नमो-यमुना-रिवर-सफारी इति क्रूज़-सेवाम् अनुभविष्यन्ति, येन नगरे नदी-पर्यटनस्य नूतनाध्यायः समारप्स्यते। सा स्व-परिवार-जनैः सह अस्याः नौका-विहार-सेवायाः आनन्दं स्वीकर्तुं दिल्लीवासिनः आमन्त्रयत्, या सेवा राष्ट्रिय-राजधान्याः देहल्याः एकां सकारात्मक-प्रतिमां जनयति। श्रीमती गुप्ता प्रत्यपादयत् यत् नगरस्य यातायात-सङ्कुलतां न्यूनीकर्तुं केन्द्रीय-मार्ग-परिवहन-राजमार्ग-मन्त्रालयेन राष्ट्रिय-राजधान्यां सपाद-लक्ष-कोटि-रूप्यकाणां विकास-प्रकल्पाः कार्यान्विताः। मुख्यमन्त्री अकथयत् यत् भाजपानेतृत्वयुतः दिल्ली-सर्वकारः जन-कल्याणाय जन-हिताय च कार्यं कर्तुं कटिबद्धः।

जापान-ओपन-बैडमिण्टन्-स्पर्धायां भारतस्य त्रीसा-जॉली गायत्री-गोपीचन्द इत्यनयोः युगलं महिला-युगलस्य पूर्व-प्रागुपान्त्यचक्रे प्रविष्टम्

जापान-देशस्य कुमामोटो-नगरे प्रचलन्त्यां जापान-ओपन बैडमिण्टन-प्रतियोगितायां भारतस्य गायत्री-गोपीचन्द-त्रीसा-जॉली इत्यनयोः युगलं महिला युगल-वर्गस्य पूर्व-क्वार्टर फाइनलचक्रे स्व-स्थानं सुरक्षितवत्। प्रारम्भिक चक्रे भारतीय-क्रीडिका-द्वयेन जापान-देशस्य हिनाता-सुजुकी नाओ-यामाकिता-युगलं एकविंशति-सप्तदश, एकविंशति-चतुर्दश इत्यङ्कैः पराजितम्।

सुभाषितम्

ॐ चन्दनस्य महत्पुण्यं, पवित्रं पापनाशनम्।
आपदां हरते नित्यं, लक्ष्मीस्तिष्ठति सर्वदा॥

भावार्थः- चंदन अत्यंत पुण्यकारी, पवित्र और समस्त पापों का नाश करने वाला होता है। यह हमेशा संकटों और आपदाओं को दूर करता है और जहाँ इसका प्रयोग या धारण होता है, वहाँ माता लक्ष्मी (समृद्धि और सौभाग्य) का वास सदैव बना रहता है

हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता १००₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263
कार्यालयः, हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य समुखे कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः-१७७१११ कार्यालयः सम्पर्कः- शिवानी शर्मा 7876636263
सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति
संपादकगणः- डॉ.अमनदीपशर्मा, डॉ.मनोज शैलः, डॉ.अमित शर्मा, डॉ.नरेन्द्रराणा,
प्रचारगणः- जगदीश डाभी, शिवा शर्मा, वत्सदेसराजः, डॉ.पद्मनाभः, डॉ.अभिषेकशर्मा

अशेषे हि देशे मान्यते अद्य भ्रातृभगिन्योः प्रेम्णः पर्व भ्रातृद्वितीया

दीपावाली-गोवर्धन-पूजा गुजराती-नववर्षं च महोल्लासेन आचरयन् अद्य सम्पूर्णे देशे भ्रातृद्वितीया महापर्वणः उल्लासः दृश्यते। यद्यपि गतदिने देशस्य विविध-भागेषु गोवर्धन पूजा महत्या धार्मिक श्रद्धया भक्त्या च आचरिता। अत्रावसरे उपराष्ट्रपतिः सी.पी. राधाकृष्णन् अथ प्रधानमन्त्री नरेन्द्रमोदी च अस्मिन् पावनावसरे समेभ्यः देशवासिभ्यः शुभाशंसाः प्रादाताम्। उपराष्ट्रपतिः प्रार्थयत् यत् भगवान् श्रीकृष्णः प्रत्येकस्मिन् गृहे सुखं, शान्तिं, समृद्धिं, सकारात्मकतां च प्रदद्यात्। एकस्मिन् सामाजिक-सञ्चार-पटलीय-सन्देशे प्रधानमन्त्रिणा प्रार्थना विहिता यत् एतत् पवित्रं पर्व सर्वेषां जीवने नूतनाम् ऊर्जा नवोत्साहं च सञ्चारयेत्, अथ च सः समेभ्यः विपुल-सुखस्य, उत्तम भाग्यस्य, समृद्धेश्च मङ्गल-कामनाः व्याहृतवान् । उत्तरप्रदेशे विशेषतया मथुरा-वृन्दावन-क्षेत्रेषु गोवर्धन पूजा महता धार्मिकोत्साहेन भक्ति-भावेन च समायोज्यते, यत्र भगवतः श्रीकृष्णस्य भक्ताः विपुलसंख्यायां समुपस्थिताः अभवन्। समग्र-विश्वे निवसन् गुजराती-समुदायः नूतन वर्ष बेस्तु-वर्ष इति महता उल्लासेन आचरितः। समग्र-विश्वे निवसन् गुजराती-समुदायः नूतन वर्ष बेस्तु-वर्ष इति महता उल्लासेन आचरति। अस्मिन् पावनावसरे केन्द्रीय गृहमन्त्री अमित शाहः अथ मुख्यमन्त्री भूपेन्द्र पटेलः च समेभ्यः शुभकामनाः प्रदत्तवन्तौ ।

भारतीय-ऋतु-विज्ञान-विभागेन आगामि-पञ्चदिनेषु अण्डमान-निकोबार-द्वीपसमूहे तीव्र-वृष्टेः पूर्वानुमानं प्रकटितम्

भारतीय-ऋतु-विज्ञान-विभागेन आगामि-पञ्चदिनेषु अण्डमान-निकोबार द्वीपसमूहे तीव्र-वृष्टेः पूर्वानुमानं प्रकटितम्। ऋतु-विभागेन तमिलनाडु-पुदुच्चेरी-कराईकल-क्षेत्रेषु अपि धारासम्पातवृष्टेः सङ्केतः प्रकटितः। ऋतु-विभागेन प्रोक्तं यत् आन्ध्रप्रदेशे, केरले, माहे-क्षेत्रे अथ च लक्षद्वीपेषु मेघ गर्जनैः, विद्युत्पातेन, तीव्र-वातेन च सह वृष्टि-सम्भावना वर्तते। इतश्च ऋतु-संस्थया आगामिनि दिवसे नवदिल्ल्यां बहुषु स्थानेषु आंशिक-मेघावृत्ताकाशस्य अथ च मन्द-मध्यम-कुज्झटिकायाः पूर्वानुमानं विहितम्।

भारतम् अधुना शत-सङ्ख्याकानां चतुरङ्ग-ग्रैण्डमास्टर्-क्रीडालूनां देशः अभवत् – प्रधानमन्त्री




प्रधानमन्त्री नरेन्द्र मोदी अवोचत् यत् भारतम् अधुना शत-सङ्ख्याकानां चतुरङ्ग-ग्रैण्डमास्टर्-क्रीडालूनां देशः अभवत्। भारतस्य शततमः चतुरङ्ग-ग्रैण्डमास्टर्-पदं प्राप्तवते अनुज श्रीवात्री इत्यस्मै शुभाशंसाः समर्पयन् प्रधानमन्त्री प्रत्यपादयत् यत् शत-ग्रैण्डमास्टर्-सीमायाः स्पर्शः उल्लेखनीयः कीर्तिस्तम्भः अस्ति, यः भारतीय-क्रीडालूनाम् अगाध-प्रतिभां, समर्पण-भावं, कठोर परिश्रमं च, अथ च युवसु चतुरङ्ग-क्रीडायाः वर्धमानां लोकप्रियतां स्पष्टतया प्रदर्शयति। एकस्मिन् सामाजिक-सञ्चार-सन्देशे प्रधानमन्त्री हर्षं प्राकटयत् यत् देशस्य विविध-भागेभ्यः समुद्भवन्त्यः चतुरङ्ग-प्रतिभाः वैश्विक मञ्चेषु स्वकीयां विशिष्टां ख्यातिं प्रतिष्ठापयन्ति। श्रीमोदी आशां व्यक्तवान् यत् एषा ऐतिहासिक उपलब्धिः युवभ्यः चतुरङ्ग-क्रीडां ग्रहीतुं अथ च अस्यां क्रीडायाम् उत्कृष्टतां प्राप्तुं प्रेरयिष्यति।

भारत-न्यूज़ीलैण्ड्-दलयोः तृतीया एकदिवसीय क्रिकेट्-स्पर्धा हैमिल्टन नगरे वर्षा-कारणात् निरस्ता



भारत-न्यूज़ीलैण्ड-दलयोः मध्ये सेडन-पार्क-क्रीडाङ्गणे आयोजिता तृतीया एकदिवसीय-अन्ताराष्ट्रिय-स्पर्धा अविरल-वृष्टि-कारणात् निरस्तीकृता। वृष्टि-बाधिते अस्मिन् द्वन्द्वे भारतेन नाणक-क्षेपं जित्वा पूर्वं क्षेत्ररक्षणस्य निर्णयः कृतः । पञ्च-स्पर्धात्मिकायां अस्यां शृङ्खलायां भारतीय-दलं पूर्ववत् द्वि-शून्यम् इत्यंकैः अग्रे वर्तते।

भारतं यूरोपीयसंघः च व्यापारम् आर्थिकसहयोगं च सुदृढीकरणाय नवदेहली-नगरे सामरिकसन्धेः समीक्षायाः सप्तमम् उपवेशनम् आयोजितवन्तौ



भारतं यूरोपीय संघः च निज-पारस्परिक-सम्बन्धस्य सम्पूर्ण-पक्षं तथा च संयुक्तव्यापक-रणनीतिक कार्यसूच्याः कार्यान्वयने प्राप्तस्य प्रगतेः समीक्षाम् अकुरुताम्। भारत-यूरोपीयसंघयोः रणनीतिक-पारस्परिक-सम्बन्धस्य सप्तमं समीक्षोपवेशनं नवदेहल्यां सम्पन्नम्। अस्मिन् उपवेशने विदेशमन्त्रालयस्य पश्चिमविभागस्य सचिवः सिबी जॉर्जः तथा यूरोपीयसंघस्य भू-अर्थशास्त्रस्य संस्थागतविषयाणां च उपमहासचिवः माट्टी मासिकासः सहाध्यक्षौ आस्ताम्। अस्मिन् उपवेशने व्यापारः, निवेशः, भारत-यूरोपीयसंघयोः मुक्तव्यापारसन्धिः, आपूर्तिशृङ्खलाः, आर्थिकसुरक्षा, स्वच्छपरिवर्तनम्, महत्त्वपूर्ण-प्रौद्योगिक्यः, अनुसन्धानम्, सम्पर्कव्यवस्था च इत्यादयः विषयाः चर्चिताः। तदतिरिच्य प्रतिभानाम् आवागमनम् तथा जनानां परस्परं सम्पर्कः, आदान-प्रदानं च इत्येते विषयाः अपि चर्चायाः केन्द्रे आसन्।

केन्द्रीयगृहमन्त्री अमितशाहः गुजरातराज्ये सहस्रकोटितोप्यधिकमूल्य-युक्तानां त्रिंशत् विकासपरियोजनानां लोकार्पणम् आधारशिलास्थापनं च कृतवान्



केन्द्रीयगृहमन्त्री तथा सहकारितामन्त्री अमितशाहः गुजरातराज्ये अनेकासाम् आधारभूतसंरचनासम्बद्धानां परियोजनानाम् उद्घाटनं शिलान्यासं च कृतवान्। स्वस्य गान्धीनगर-लोकसभाक्षेत्रे सः सहस्रकोटि-तोप्यधिकव्ययुक्तानां त्रिंशत् विकास-परियोजनानां शिलान्यासं कृतवान्। अस्मिन् अवसरे भाषमाणः श्रीशाहः स्वस्य पुरातनस्मृतीः स्मृतवान्। सः अवदत् यत् सामाजिकनेतृत्वेन मम कार्यजीवनस्य आरम्भः रामपीर-पर्वतात् अभवत् इत्येतत् केचिद् जनाः एव जानन्ति। सः अवदत् यत् प्रधानमन्त्री नरेन्द्रमोदी तथा मुख्यमन्त्री भूपेन्द्रपटेलयोः नेतृत्वे सम्पूर्णे गुजरातराज्ये व्यापकाः व्यवस्थाः क्रियान्विताः भवन्ति। श्रीशाहः सूचितवान् यत् विगतेषु सप्तवर्षेषु गान्धीनगरलोकसभाक्षेत्रे पञ्चविंशतिसहस्र-कोटिरूप्यकाणां विकासकार्याणि सम्पन्नानि जातानि । केन्द्रीयमन्त्री अमितशाहः अवदत् यत् अष्टाविंशत्यधिकद्विसहस्र तमस्य वर्षस्य दिसम्बरमासस्य एकत्रिंशत्तमदिनात् पूर्वमेव गुजरातराज्यं पूर्णतया मादकद्रव्यैः मुक्तं भविष्यति।

उत्तररेलविभागेन छठ-महोत्सवे यात्रिकाणां महतीं सम्मर्दस्थितिं नियन्त्रयितुं यात्रिणां सौविध्याय विस्तृताः व्यवस्थाः कृता



उत्तररेलवे यात्रिणां सौविध्याय विशेषतः देशस्य पूर्वीयभागेषु छठपर्वम् आचरितुं यात्रिणां कृते, देहलीक्षेत्रस्य प्रमुखेषु रेलस्थानकेषु विस्तृताः व्यवस्थाः अकरोत्। उत्तररेलवे विभागेन उक्तं यत् नवदेहल्यां स्थायी-प्रतीक्षाक्षेत्रात् अतिरिक्तं आनन्दविहार टर्मिनल्-रेलस्थानके अस्मिन् वर्षे एकं नूतनं स्थायी-प्रतीक्षाक्षेत्रं निर्मितम् अस्ति। अस्मिन् रेलस्थानके एकं अस्थायी प्रतीक्षाक्षेत्रम् अपि स्थापितम् अस्ति। एतेषु प्रतीक्षाक्षेत्रेषु यूटीएस्-टिकट-विक्रय-केन्द्राणि, शौचालयाः, स्वचालित-टिकट-विक्रय-यन्त्राणि, खाद्यविक्रय-स्थानानि तथा 'मे आई हेल्प यू' (May I Help You) सहायता-केन्द्राणि च स्थापितानि सन्ति। उत्तररेलवे विभागस्य मुख्यजनसम्पर्काधिकारी हिमांशु शेखर उपाध्यायः उक्तवान् यत् वरिष्ठाधिकारिणः देहलीक्षेत्रस्य प्रमुखेषु रेलस्थानकेषु यात्रिणां सम्मर्दं निरीक्षन्ते। आवश्यकतानुसारं पूर्वसूचनां विना सञ्चालितानां विशेषरेलयानानाम् अपि व्यवस्था भविष्यति।

भारतदेशेन विगतद्विसप्ताहाभ्यां यमनदेशे अवरुद्धाः एकोनविंशतिः नाविकाः सुरक्षिताः उद्घारिताः



यमन-देशस्य हुदैदाह-सना-नगरयोः अतीते पक्षद्वये अवरुद्धाः नवदश भारतीय-नाविकाः सकुशलं समुद्धृताः स्वदेशं प्रति च प्रस्थिताः। यमन स्थित-भारतीय दूतावासेन प्रोक्तं यत् सर्वे नाविकाः सुरक्षिताः स्वास्थ्यानुकूलाश्च सन्ति। दूतावासेन सामाजिक-अन्तर्जाले एतेषां क्षेम-समुद्धारे सहयोगिभ्यः सम्बद्धपक्षेभ्यः कृतज्ञता प्रकटीकृता।

मालदीवदेशस्य कारागारात् मुक्ताः चतुर्विंशतिः तमिलनाडुराज्यस्य मत्स्यजीविनः स्वदेशं प्रत्यावर्तिताः

थुथुकुडी- क्षेत्रस्य चतुर्विंशति मत्स्यजीविनः माल्दीव्स-देशस्य कारागारात् मुक्ताः अभवन्। ते अक्टूबर्-मासस्य प्रथमे दिनाङ्के अरेबियन समुद्रे मत्स्य-ग्रहणस्य समये अन्ताराष्ट्रिय-जलक्षेत्रे अतिक्रमणस्य कारणात् माल्दीव्स्-नौसेनया गृहीताः आसन्। मत्स्यजीविनः विमानेन तिरुवनंतपुरं प्रति प्रेषिताः। तमिलनाडु-मत्स्यपालनविभागस्य अधिकारिणः विमानस्थानके मत्स्यजीविनां स्वागतम् अकुर्वन्, तान् स्वगृहं प्रेषितवन्तः ।

तुर्किए-देशस्य भूमध्यसागरीय-तटे द्विशतं यावत् देशानाम् प्रतिनिधयः, संयुक्तराष्ट्रसङ्घस्य ऋतुदशा-सम्मेलनस्य सी.ओ.पी. एकत्रिंशत् इति सप्ताहद्वयोः कृते एकत्रिताः सन्ति



तुर्किए-देशस्य भूमध्यसागरीय-तटे प्रायः द्विशतं यावत् देशानाम् प्रतिनिधयः, वर्धमान-वैश्विक ऊर्जायाः पर्यावरणस्य च समाह्वानानां मध्ये, संयुक्तराष्ट्रसङ्घस्य ऋतुदशा-सम्मेलनस्य सी. ओ. पी. एकत्रिंशत् इति सप्ताहद्वयोः कृते एकत्रिताः सन्ति। वार्तायां विद्युतीकरणस्य गतिं वर्धयितुं, हरितगृहवायु-उत्सर्जनं न्यूनीकर्तुं, पुनर्नवीकरणीय ऊर्जायाः प्रोत्साहनं च भविष्यति इति अपेक्षा अस्ति। परञ्च इरान-देशस्य वर्तमान-संघर्षः, अङ्गारस्य उपरि वर्धित अवलंबनम्, कृत्रिम-बुद्धिद्वारा विद्युदुत्पादनस्य वर्धित-आग्रहः च जलवायु-प्रयत्नान् जटिलं करोति। अमरीका-देशः निरन्तरं द्वितीये वर्षे अपि अन्ताराष्ट्रिय-ऋतुदशा-सम्मेलनात् दूरं वर्तते ।।

अनुजश्रीवात्री फिलिपीन्सदेशे आयोजितायां आसियान्-प्लस्-इंडिविजुअल-ओपन्-चेस्-चैम्पियन्शिप् प्रतियोगितां विजयं प्राप्य भारतस्य शततमः ग्राण्डमास्टरः अभवत्



मध्यप्रदेशस्य अन्ताराष्ट्रिय चतुरङ्ग क्रीडकः अनुज श्रीवात्री इत्ययं फिलिपीन्स-देशे सप्तमम् आसियान्-प्लस्-इंडिविजुअल-ओपन्-चेस्-चैम्पियन्शिप् प्रतियोगितां जित्वा भारतस्य शत-तमः ग्रैण्डमास्टर अभवत् तथा च उपाधिम् प्राप्तः स्वराज्यस्य प्रथमः अभवत्। आरम्भिक-चक्रे पराजयानन्तरं, स्वस्य अन्तिम अष्टक्रीडासु सप्त-अङ्कान् प्राप्य, श्रीवात्री उपाधिं प्राप्तवान्। एषा उपलब्धिः विशेषतया महत्त्वपूर्णा आसीत् यतोहि भारते चतुरङ्ग-क्रीडाप्रेमिणः देशस्य शत-तमस्य ग्रैण्ड्यास्टर-पदकस्य प्रतीक्षारताः आसन्, तत्रैव मध्यप्रदेशः स्वस्य प्रथम-क्रीडकस्य प्रतिष्ठित-उपाधिं प्राप्तुं प्रतीक्षमाणः आसीत्। अखिल भारतीय-चेस्-फ़ेडरेशन् इत्यस्य अध्यक्षः नितिन नारङ्गः अनुजश्रीवात्री इत्यमुं भारतस्य शततमः ग्रैण्डमास्टर् इति भवितुं अभिनन्दितवान्। सः इयं उपलब्धिम् ऐतिहासिकं सोपानं, भारतीय-चतुरङ्गस्य कृते गौरवपूर्णं च क्षणम् इति वर्णितवान्।

इलाहाबाद- उच्चन्यायालयेन जन्म- मृत्यु- पञ्जीकरणस्य संशोधितविधेयकसम्बद्धाः निर्देशाः निर्गताः



हिमसंस्कृतवार्ताः- वृजेशकुमारपाण्डेयः,

प्रयागराजम्। इलाहाबाद- उच्चन्यायालयस्य महानिबन्धकेन उत्तरप्रदेशस्य समस्तेभ्यः जनपदन्यायाधीशेभ्यः, प्रधानन्यायाधीशेभ्यः, पीठासीनाधिकारिभ्यः २०२६ तमस्य वर्षस्य अक्तूबरमासस्य २७ दिनाङ्के महत्त्वपूर्णं प्रशासनिकं पत्रं प्रेषितम्। एतत् पत्रं भारतस्य राजपत्रे २०२६ तमस्य वर्षस्य अगस्तमासस्य ६ दिनाङ्के प्रकाशितस्य जन्म-मृत्युपञ्जीकरणस्य (संशोधन) अधिनियमस्य, २०२६ अनुपालनसम्बद्धान् निर्देशान् प्रदातुं निर्गतम्। संशोधितेन अधिनियमेन जन्म- मृत्यु-पञ्जीकरणाधिनियमस्य, १९६९ तमस्य वर्षस्य, त्रयोदशायाः धारायाः ३(क) उपधारायां संशोधनं कृतम्।

नूतननियमानुसारं यदि कस्यचित् जन्मनः अथवा मृत्योः सूचना घटनायाः द्विवर्षानन्तरं दीयते, तर्हि तस्य पञ्जीकरणं सम्बन्धितक्षेत्रस्य प्रथमश्रेण्याः न्यायिकदण्डाधिकारिणः आदेशेन, घटनायाः सत्यतायाः परीक्षणानन्तरं, निर्धारितशुल्कस्य भुक्तिं च कृत्वैव कर्तुं शक्यते। उच्चन्यायालयेन संशोधितविधेः समुचितपालनं सुनिश्चितं कर्तुं सर्वेभ्यः न्यायिकाधिकारिभ्यः भारतस्य राजपत्रस्य प्रतिलिपिः अपि प्रेषिता अस्ति। अनेन संशोधनेन द्विवर्षात् प्राचीनानां जन्म- मृत्यु-पञ्जीकरण- प्रकरणानां कृते न्यायिकप्रक्रिया अधिकं सुव्यवस्थिता भविष्यति।

जनगणना-२०२७ : सुगमा जनगणना, सशक्ता जनसहभागिता च



हिमसंस्कृतवार्ताः- वृजेशकुमारपाण्डेयः, अमेठी। जनगणना- २०२७ इत्यस्य सफलतापूर्वकं, पारदर्शितया, निर्धारितसमये च सञ्चालनार्थं तथा सामान्यजनानां सुविधायै अमेठीजनपदे जनपदस्तरीयः जनगणना-नियन्त्रणकक्षः स्थापितः।अस्य नियन्त्रणकक्षस्य माध्यमेन स्वयंगणना, जनगणनापट्टिका, गणकानां पर्यवेक्षकाणां च समस्यासु शीघ्रं समाधानं प्रदास्यते। सामान्यजनानां कृते आवश्यकं मार्गदर्शनं तथा तान्त्रिकी सहायता अपि उपलब्धा करिष्यते। जनपदस्तरीयः जनगणनानियन्त्रणकक्षस्य दूरभाषसङ्ख्या ₹-०५३६८-२४४१३४। जनगणनासम्बद्धायाः कस्याश्चित् सूचनायाः, शिकायतायाः अथवा तान्त्रिकसमस्यायाः समाधानार्थं जनाः उक्तदूरभाषसङ्ख्यायां सम्पर्कं कर्तुं शक्नुवन्ति। सम्बद्धेभ्यः अधिकारिभ्यः, मुख्यप्रशिक्षकेभ्यः प्राप्तशिकायतानां शीघ्रनिस्तारणाय, प्रभाविसमन्वयाय, निरन्तरनिरीक्षणाय च आवश्यकाः निर्देशाः प्रदत्ताः सन्ति। जनसहभागितैव जनगणनायाः सफलतायाः प्रमुखम् आधारम् अस्ति। अतः सर्वे नागरिकाः जनगणना-२०२७ इत्यस्य सफलसञ्चालने सक्रियतया सहयोगं कुर्वन्तु।

सम्पूर्णानन्द-संस्कृत-विश्वविद्यालय-वाराणस्याः कुलपतिना प्रो. बिहारीलालशर्मणा सह 'हिमसंस्कृतवार्तायाः' पक्षतः डॉ. मनोजशैलेन विहितं शिष्टाचार-मेलनम्

- संस्कृत-प्रचार-प्रसारं 'पहाड़ी गल्लां' कार्यक्रमं च अधिकृत्य कुलपति-महोदयः ज्ञापितः
- कुलपतिना प्रो. शर्मणा 'हिमसंस्कृतम्' इत्यस्य प्रयासाः भृशं श्लाघिताः, कार्यक्रमेषु सहभागितायाः प्रदत्तम् आश्वासनम्



हिमसंस्कृतवार्ता — बिलासपुरम्।

'हिमसंस्कृतवार्ता' इत्यस्य सम्पादकेन 'हिमसंस्कृतम्-न्यासस्य' न्यासिना च डॉ. मनोजशैलेन प्रतिष्ठितस्य सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयस्य वाराणसी इत्यस्य माननीयकुलपतिना प्रो. बिहारीलालशर्मणा सह सौहार्दपूर्णं शिष्टाचार-मेलनम् कृतम्। अस्याः वार्तायाः अन्तराले तयोर्मध्ये संस्कृतभाषायाः संवर्धन-संरक्षणाभ्यां सम्बद्धेषु विविधविषयेषु सविस्तरा सार्थका च चर्चा सम्पन्ना।

डॉ. मनोजशैलः कुलपतिमहोदयं 'हिमसंस्कृतम्-प्रकल्पस्य' अन्तर्गततया समग्रराष्ट्रे संस्कृतवार्तानां (वार्तामाध्यमस्य) साहाय्येन क्रियमाणस्य भाषाप्रचारप्रसारस्य पूर्णविवरणं प्रददत्। सहैव तेन हिमाचलप्रदेशस्य स्थानिक-उपभाषाणां (बोलीनां) संरक्षण-संवर्धनयोः उद्देश्येन आरब्धस्य नूतनोपक्रमस्य (नवाचारिणः) 'पहाड़ी गल्लां' इत्याख्यस्य कार्यक्रमस्य रूपरेखां गतिविधींश्च अधिकृत्य अपि कुलपतिमहोदयः परिज्ञापितः।मूलतः हिमाचलप्रदेशस्य बिलासपुर-मण्डलेन सम्बद्धाः प्रख्याताः संस्कृतविद्वांसः प्रो. बिहारीलालशर्माणः स्वकीयायाः बौद्धिकयोग्यतायाः निष्ठायाश्च बलेन वैश्विकस्तरे हिमाचलप्रदेशस्य गौरवं वर्धितवन्तः। मेलन-वार्ताकाले तैः 'हिमसंस्कृतवार्ता' इत्यनया क्रियमाणानां समेषां प्रयासानां भूरि-भूरि प्रशंसा विहिता। प्रो. शर्मा-महोदयः अवदत् —"अतीव प्रशंसनीयम् इदं कार्यं यद् हिमाचलसदृशात् पार्वत्यराज्यात् आरब्धः अयम् उपक्रमः अद्य वैश्विकस्तरे संस्कृतविदुषां मध्ये एका सुदृढा सकारात्मकप्रयासत्वेन ख्यातिं प्राप्तवान् अस्ति।" कुलपतिना प्रो. शर्मणा अग्रे प्रतिपादितं यत् हिमाचलप्रदेशे संस्कृतं प्रति असीमाः सम्भावनाः वर्तन्ते, यस्य प्रत्यक्षं प्रमाणं वर्तमानवंशस्य समर्पितेषु संस्कृतशिक्षकेषु युवकेषु च दृश्यते।

तैः राज्यस्य संस्कृतज्ञानां समर्पणभावं श्लाघमानैः रेखाङ्कितं यद् अद्य संस्कृतस्य लघुषु बृहत्सु च राष्ट्रियसङ्कटनेषु हिमाचलस्य युनः नेतृत्वभूमिकाम् उद्वहन्ति, यद् राज्यस्य राष्ट्रस्य च उभयोः भविष्यस्य कृते अतीव मङ्गलकारी सङ्केतः वर्तते। चर्चायाः पर्यवसाने (समापने) कुलपतिना प्रो. बिहारीलालशर्मणा समाश्वासितं यत् भविष्ये 'हिमसंस्कृतम्-न्यास' पक्षतः आयोज्यमानेषु कार्यक्रमेषु ते सहर्षं भागं ग्रहीष्यन्ति स्वकीयं पूर्णसहयोगं च प्रदास्यन्ति।

देवभूमौ हिमाचले भवेत् एकः संस्कृत-विश्वविद्यालयः — कुलपतिना प्रो. बिहारीलालशर्मणा

प्रदेशसर्वकारः साग्रहम् अभ्यर्थितः

हिमसंस्कृतवार्ताः - बिलासपुरम्। सम्पूर्णानन्द-संस्कृत-विश्वविद्यालय-वाराणस्याः माननीयेन कुलपतिना प्रो. बिहारीलालशर्मणा हिमाचलप्रदेशसर्वकारं प्रति देवभूमौ पृथक्-संस्कृत-विश्वविद्यालयस्य संस्थापनाय सबलम् अभ्यर्थनम् उपस्थापितम्।

कुलपतिमहोदयेन रेखाङ्कितं यद् उत्तराखण्डः, हरियाणा, देहली, उत्तरप्रदेशः, कर्णाटकम्, केरलम्, मध्यप्रदेशः, गुजरातम् इत्यादयः समेऽपि प्रमुखाः प्रदेशाः स्वकीयान् पृथक्-संस्कृत-विश्वविद्यालयान् धारयन्ति, यैः तत्रत्य-पारम्परिक-ज्ञानपरम्परायाः उच्चस्तरीय-अनुसन्धानस्य च अभूतपूर्वः विकासः जायते। किन्तु अतीव खेदस्य विषयोऽस्ति यत् 'देवभूमिः' इति ख्याते, ऋषीणां तपःस्थल्याम् अस्मिन् हिमाचलप्रदेशे अद्यापि एकस्यापि संस्कृतविश्वविद्यालयस्य अभावः वर्तते।

तैः स्पष्टीकृतं यत् हिमाचलप्रदेशे बहुसंख्याकाः सर्वकारीयाः अशासकीयाश्च संस्कृतमहाविद्यालयाः संवृद्धाः सन्ति, यतः प्रतिवर्षं सहस्रशः प्रतिभावन्तः शास्त्रि-स्नातकाः (शास्त्री-उत्तीर्णाः) निर्गच्छन्ति। किन्तु प्रदेशे स्वतन्त्रस्य संस्कृतविश्वविद्यालयस्य अभावात् उच्चशिक्षायै, विशिष्टानुसन्धानाय, आचार्य-विद्यावारिधि-सदृश-उच्चपदवीभ्यश्च एतेभ्यः छात्रेभ्यः स्वगृहं स्वराज्यं च विहाय सुदूरं देहलीं, वाराणसीं, जयपुरं, तिरुपतिं वा प्रति गन्तव्यं भवति। अनेन आर्थिकदृष्ट्या दुर्बलानां, विशेषतः ग्रामीण-पार्वत्यक्षेत्राणां छात्राणां कृते उच्चशिक्षायाः मार्गे महती बाधा समुत्पद्यते।कुलपतिना प्रो. बिहारीलालशर्मणा छात्रहितं प्रदेशस्य सांस्कृतिक-गरिमां च अवधाय प्रदेशसर्वकाराय साग्रहं परामर्शः दत्तः यत्— "हिमाचलप्रदेशस्य मध्यवर्तिनि कस्मिंश्चिद् उपयुक्ते क्षेत्रे शीघ्रमेव एकस्य सर्वसुविधायुक्तस्य संस्कृतविश्वविद्यालयस्य स्थापना विधातव्या, येन प्रदेशस्य समस्तमहाविद्यालयाः एकेनैव सूत्रेण सम्बद्धाः भवेयुः, शोधच्छात्रेभ्यश्च स्वराज्ये एव उच्चस्तरीय-अध्ययनस्य असीम-अवसराः समुपलब्धाः स्युः।" कुलपतिमहोदयस्य अनेन आह्वानेन प्रदेशस्य संस्कृतविद्वत्समाजे, प्राध्यापकेषु, छात्रेषु च पुनरेकवारं देवभूमौ संस्कृतविश्वविद्यालय-संस्थापनायाः याचनायै नूतनः उत्साहः सञ्चारितः।

सिलिगुरीतः दार्जिलिंगपर्यन्तं यात्रा

हिमसंस्कृतवार्ताः- रवि खरिडेहालः, बेङ्गलूरु।

"सिलिगुरीतः दार्जिलिंगपर्यन्तं यात्रायां अद्भुतदृश्यानि दृश्यन्ते ।" एतस्यां यात्रायां विश्वस्य ५ उच्चतमशिखरेषु ४ शिखर- अवशोषयन् दृश्यानि प्राप्यन्ते। अस्मिन् यात्रायां एवरेस्ट- कञ्चनजङ्घा-पर्वतानां शिखरैः सह चाय-उद्यानानां, नद्यः, मठानां च सुरम्यदृश्यानि अपि प्राप्यन्ते। पूर्वदार्जिलिंगस्य उपत्यकायाः, पश्चिमदार्जिलिंगस्य उपत्यकायाः, तीस्ताउपत्यकायाः, मिरिकस्य च द्रष्टव्याः दृश्याः सन्ति। सिलिगुरी दार्जिलिंगचायस्य व्यापारकेन्द्रम् अस्ति। चायपत्रं जीआई-टैग इत्यनेन रक्षितः भवति। जीआई-टैग इत्युक्ते भौगोलिक- सङ्केत- चिह्नम् अस्ति। यात्रा अत्र आरभ्यते। अहल दारा दर्शनीयः दृश्यबिन्दुरस्ति। तस्मात् दृश्यबिन्दुतः कञ्चनजङ्घा शिखरम् उदयमानस्य सूर्यस्य पृष्ठभूमितः अद्भुतम् अस्ति। प्रातःकाले वायुना शीतलताम् अतितर्तुं चायः प्रस्तावितः अस्ति, अतीव स्वागतं च भवति। नेपालसीमायाः समीपे स्थिते मिरिके चायउद्यानेषु विहारं कुर्वन्तः होमालयाः दृश्यन्ते स्म। प्रातःकाले तुषारेण हिमालयस्य क्षीणतां जनाः अनुभवितुं शक्नुवन्ति। तुषारेण हिमशिखरान् गोपयति प्रकाशयति च। हिमालयस्य रेलमार्गः रेलयानयात्रा च जैवविविधतायाः दृश्यानि पर्वतवक्रयात्रायाः अनुभवं च प्रददाति।

आनी-क्षेत्रे जयरामस्य सुक्खू-सर्वकारोपरि तीक्ष्णः प्रहारः, उक्तवान्—पिहिताः विद्यालयाः

चिकित्सालयाश्च, पशुचिकित्सालयेष्वपि आरोपितं तालकम्



हिमसंस्कृतवार्ता — कुल्लू। पूर्वमुख्यमन्त्री प्रतिपक्षनेता च जयरामठाकुरः आनी-क्षेत्रे नवनिर्वाचितानां जनप्रतिनिधीनां सम्मानसमारोहे प्रदेशस्य काङ्ग्रेस-सर्वकारस्योपरि तीक्ष्णं प्रहारम् अकरोत्। सः अवदत् यत् स्वजनानां काठिन्यं निवारयितुं तेषां च भारं लघूकर्तुं यत् सुखं भवति, तस्य आनन्दः एव अपरः वर्तते। अस्मिन्नेव क्षेत्रे जातत्वात् संवर्धितत्वाच्च सः अत्रत्यानां जनानां समस्याः काठिन्यानि च सम्यक्तया अवगच्छति।

जनसभां सम्बोधयता जयरामठाकुरेण प्रतिपादितं यत् तस्य पूर्वतनसर्वकारेण जनानां सौकर्यार्थं कार्यं कृतं तथा च कोविड-विभीषिका-सङ्कटस्य मध्येऽपि मार्गनिर्माणक्षेत्रे कीर्तिमानानि (रिकॉर्ड) स्थापितानि। सः पक्षं कृतवान् यत् तस्य सर्वकारेण वृद्धानां कृते निवृत्तिवेतनस्य (पेंशन) प्रदानाय प्रथमे मन्त्रिमण्डलोपवेशने (कैबिनेट-गोष्ठ्याम्) एव प्रयासाः आरब्धाः आसन्।

आनी-क्षेत्रे संस्थानानां पिधानस्य आरोपः

जयरामठाकुरः आक्षेपम् अकरोत् यत् मुख्यमन्त्री सुखविन्दरसिंहसुक्खू-महोदयः सत्ताग्रहणात् परं जनानां सौकर्याय उद्घाटितानि सहस्राधिकाणि संस्थानानि पिहितवान्। सः अवदत् यत् आनी-विधानसभाक्षेत्रे विद्यालयानां, चिकित्सालयानां, सर्वकारीयकार्यालयानां च सहैव षडधिकाः पशुचिकित्सालयाः अपि पिहिताः। सः अकथयत् यद् आनी-क्षेत्रं पशुपालने दुग्धोत्पादने च महत्त्वपूर्णां भूमिकां निर्वहति। ईदृशावस्थायां पशूनाम् उपचाराय पशुचिकित्सालयानाम् आवश्यकता वर्तते। सः सर्वकारस्योपरि पशुपालकानां समस्यानाम् उपेक्षायाः आरोपम् अकरोत्।

बीबीएमबी (BBMB) तथा 'वाइल्डफ्लावर हॉल' प्रकरणयोः अपि उत्थापिताः प्रश्नाः

प्रतिपक्षनेत्रा मुख्यमन्त्रिणः उपरि उपलब्धीनां श्रेयग्रहणाक्षेपं कुर्वता 'बीबीएमबी' तथा 'वाइल्डफ्लावर हॉल' इत्याख्यौ विषयौ उत्थापितौ। सः अवदत् यत् बीबीएमबी-संस्थायाः अन्तिमः विजयः २०११ तमे वर्षे तत्कालीनमुख्यमन्त्रिणः प्रेमकुमारधूमलस्य सर्वकारस्य कार्यकाले सञ्जातः आसीत्। अपरत्र 'वाइल्डफ्लावर हॉल' सम्बद्धः विजयः अक्टोबर् २०२२ मध्ये लब्धः आसीत्, यदा तु सुखविन्दरसिंहसुक्खू-महोदयः अस्य मासद्वयानन्तरं मुख्यमन्त्री अभवत्।

सुन्दरसिंहठाकुरम् अधिकृत्य अपि विहिता टिप्पणी

जयरामठाकुरेण विधायकं सुन्दरसिंहठाकुरम् अधिकृत्य अपि मुख्यमन्त्री लक्षीकृतः। सः अवदत् यत् मन्त्रिपदप्रदानस्य नाम्नि तस्मै दीर्घकालात् प्रतीक्षा कारिता वर्तते। सः परामर्शं प्रददात् यत् सुन्दरसिंहठाकुरेण मन्त्रिपदस्य अपेक्षया स्वस्वाभिमानः प्राथमिकतया स्वीकरणीयः मुख्यमन्त्रिणे च स्पष्टतया वक्तव्यं यत् सः मन्त्री भवितुं नेच्छति।

पञ्चायतनिर्वाचनस्य काङ्ग्रेस-दलस्य पराजयस्य च प्रतिपादनम्

जयरामठाकुरः प्रावोचत् यत् मुख्यमन्त्री स्वकीयसर्वकारस्य स्थितिं विलोक्य पञ्चायतनिर्वाचनं कारयितुं नैच्छत्। सः आरोपम् अकरोत् यत् निर्वाचनस्य स्थगनाय प्रकरणं सर्वोच्चन्यायालयं यावत् नीतं तथा च अधिवक्तृषु कोटिशः रूप्यकाणि व्ययीकृतानि। सः अवदत् यद् भाजपा-दलेन निर्वाचनसञ्चालनाय प्रयासाः विहिताः अन्ततः च निर्वाचनानि सम्पन्नानि। जयरामठाकुरेण विश्वासः कृतः यद् जिला-परिषदः निर्वाचने काङ्ग्रेस-दलेन द्वादशसु मण्डलेषु एकादशसु (११/१२) पराजयः अनुभूतः, यदा तु चम्बा-मण्डले भाजपा-दलं केवलम् एकेन मतेन पृष्ठतः अभवत्। सः आगामिनि विधानसभा-निर्वाचनेऽपि काङ्ग्रेस-दलस्य पराभवस्य पक्षम् अकरोत्।

निर्वाचन-प्रतिज्ञासु स्वास्थ्यसुविधासु चापि सर्वकारः आक्षिप्तः

प्रतिपक्षनेत्रा काङ्ग्रेस-दलस्य निर्वाचन-प्रतिज्ञासु प्रश्नान् उत्थापयता पृष्टं यत् प्रदेशस्य कियतीभ्यः महिलाभ्यः १५०० रूप्यकाणां सम्मानराशिः प्रदत्ता? सः युवकेभ्यः वृत्तिप्रदानस्य (रोजगारस्य) प्रतिज्ञायामपि सर्वकारम् आक्षिप्तवान् आरोपं च अकरोत् यत् कोविड-विभीषिकाले रुग्णानां साहाय्यं कृतवन्तः केचन युवानः अपि सेवातः निष्कासिताः। सः आनी-क्षेत्रे स्वास्थ्यसेवानां स्थितावेव चिन्तां प्रकटयन् अवदत् यत् चिकित्सालयेषु वैद्यानां स्वास्थ्यकर्मिणां (पैरामेडिकल-कर्मिणां) च महती न्यूनता वर्तते। बहुषु स्थानेषु क्ष-किरण (X-Ray) पराश्रव्यध्वनि (Ultrasound) सदृशाः सुविधाः अपि नोपलभ्यन्ते। सः इदमपि आरोपयत् यत् लोकयानानाम् अर्धाधिकाः मार्गाः पिहिताः सन्ति, दुग्धोत्पादकेभ्यश्च समये भुक्तिः न प्रदीयते।

जयरामठाकुरः अवदत् यत् मुख्यमन्त्री प्राकृतिकापदः समये आनी-विधानसभाक्षेत्रे केवलम् एकवारमेव सम्प्राप्तः, यदा तु तस्य मुख्यमन्त्रित्वकार्यकाले सः सप्तवारम् अत्र आगतवान् आसीत्। सः स्वसर्वकारस्य काले मार्ग-स्वास्थ्य-शिक्षा- 'जलजीवन-अभियान'-अन्तर्गततया शतशः कोटिरूप्यकाणां योजनानां सञ्चालनस्य प्रतिपादनम् अकरोत्।

भ्रातृद्वितीयायां प्रदेशे ११ नवम्बर-दिनाङ्के सार्वजनिकः अवकाशः, विद्यालयाः महाविद्यालयाश्च सर्वे भविष्यन्ति पिहिताः

अधिसूचना निर्गता

हिमसंस्कृतवार्ता — शिमला। हिमाचलप्रदेशे भ्रातृद्वितीयायाः (भैया-दूज) अवसरे अस्मिन्नवसरे सर्वकारीय-कर्मचारिणः अधिकृत्य महान् व्यत्ययः कृतः। अधुना अस्मिन् पर्वणि केवलं महिलाकर्मचारिभ्यः एव न, अपि तु पुरुष-कर्मचारिभ्यः अपि अवकाशः लप्स्यते। मुख्यमन्त्री सुखविन्दरसिंहसुक्खू-महोदयः मङ्गलवासरे अस्मिन् सन्दर्भे निर्णयम् अकरोत्। तदनन्तरं सर्वकारेण ११ नवम्बर् २०२६ दिनाङ्के सार्वजनिक-अवकाशस्य अधिसूचना निर्गमिता। मुख्यमन्त्रिणः अनेन निर्णयेन प्रदेशस्य सर्वकारीय-कार्यालयेषु कार्यरताः महिला-पुरुषाः उभयेऽपि कर्मचारिणः भ्रातृद्वितीया-पर्व स्वपरिवारैः सह आचरितुं पारयिष्यन्ति।

मुख्यमन्त्रिणः समीपे प्रेषिता आसीत् अवकाशस्य सञ्चिका

भ्रातृद्वितीयायां सर्वेभ्यः सर्वकारीयकर्मचारिभ्यः अवकाशप्रदानस्य प्रस्तावः मुख्यमन्त्रिणः सुखविन्दरसिंहसुक्खू-महोदयस्य समीपे प्रेषितः आसीत्। मङ्गलवासरे अपराह्णे मुख्यमन्त्रिणा अस्मिन् विषये निर्णयः स्वीकृतः। तदनन्तरं सम्बद्धविभागेन अवकाशस्य अधिसूचना निर्गता। सर्वकारस्य आदेशानुसारं बुधवासरे ११ नवम्बर्-दिनाङ्के प्रदेशस्य सर्वेषां सर्वकारीयकार्यालयानां सहैव विद्यालयाः, महाविद्यालयाः, मण्डलानि (बोर्ड), निगमानां कार्यालयाश्च अपि पिहिताः स्थास्यन्ति।

रक्षाबन्धने करवाचौथ-पर्वणि च अपि परिवर्तिता आसीत् व्यवस्था

प्रदेशे पूर्वं रक्षाबन्धनम्, करवाचौथ, भ्रातृद्वितीया-सदृशेषु उत्सवेषु केवलं महिलाकर्मचारिभ्यः एव अवकाशः दीयते स्म। मुख्यमन्त्री सुक्खू-महोदयः इतः पूर्वं रक्षाबन्धने करवाचौथ-पर्वणि च अपि पुरुष-कर्मचारिभ्यः अवकाशप्रदानस्य घोषणां कृतवान् आसीत्। अधुना भ्रातृद्वितीयायामपि पुरुष-कर्मचारिभ्यः अवकाशप्रदानस्य निर्णयः कृतः अस्ति। एवं प्रकारेण सर्वकारेण एतेषु उत्सवेषु अवकाशस्य पुरातनव्यवस्थायां परिवर्तनं विहितम्।

११ नवम्बर्-दिनाङ्के सर्वकारीय-संस्थानेषु स्थास्यति अवकाशः

सामान्य-प्रशासन-विभागेन १० नवम्बर् २०२६ दिनाङ्के निर्गतायाः अधिसूचनायाः अनुसारेण बुधवासरे ११ नवम्बर्-दिनाङ्के सार्वजनिकः अवकाशः भविष्यति। अयम् आदेशः प्रदेशस्य सर्वेषु सर्वकारीयविभागेषु, मण्डलेषु, निगमेषु, विद्यालयेषु, महाविद्यालयेषु, विश्वविद्यालयेषु च प्रवर्तिष्यते।

अष्टादश प्रमुखाः वार्ताः



हिमसंस्कृतवार्ताः- वृजेशकुमारपाण्डेयः

१. **नवदेहली-** प्रधानमन्त्री नरेन्द्रमोदी यूक्रेनदेशस्य राष्ट्रपतिना वोलोदिमिर् जेलेंस्किना सह दूरभाषमाध्यमेन वार्तां कृतवान्। युद्धसमाप्तये सहयोगस्य प्रस्तावं दत्त्वा शान्तिप्रयासेषु भारतस्य पूर्णसमर्थनं प्रकटितवान्।

२. **जनगणना-२०२७-** राष्ट्रं २४.२५ लक्षं गृहसूचीकरणखण्डेषु विभक्तम्। प्रत्येकस्मिन् खण्डे १५० तः २०० गृहाणि भविष्यन्ति। एकः जनगणनाकर्मी प्रायः ८०० जनानां गणनां करिष्यति।

३. **नवदेहली-** सोनियागान्धिनः 'बिलॉन्गिंग्-अ जर्नी ऑफ लव' इति पुस्तकस्य विमोचनम् अद्य भविष्यति। विशेषः समारोहः न आयोज्यते, पुस्तकं विक्रयकेन्द्रेषु उपलब्धं भविष्यति।

४. **नवदेहली-** दीपावलीशुभकामनासन्देशेषु ईद पर्वणः उल्लेखः अनुचितः इति रामदास अठावले इत्यनेन कांग्रेसाध्यक्षस्य मल्लिकार्जुनखड्गेवर्यस्य आलोचना कृता।

५. **नवदेहली-** भाजपा-सांसदः निशिकान्तदुबे राहुलगान्धिनः २०१८ तमे वर्षे चीनदेशस्य मन्त्रिभिः सह कृतायाः भेटायाः विषये प्रश्नम् उत्थापितवान्। चीनदेशं प्रति प्रेषितानां द्विशतं जनानां विषये अपि प्रश्नः कृतः।

६. **नवदेहली-** ईद उत्सवः अस्ति, अस्य अर्थः अन्तर्जालमाध्यमेन अपि ज्ञातुं शक्यते इति कांग्रेसनेता पवनखेडा भाजपा-दलस्य आलोचनां कृतवान्।

७. **छत्तीसगढः-** प्रधानमन्त्री नरेन्द्रमोदिनः वक्तव्यस्य प्रत्युत्तरे कांग्रेसदलेन प्रधानमन्त्रिणः आलोचना कृता। तस्य पदत्यागस्य समयः समीपम् आगच्छतीति उक्तम्।

८. **राजस्थानम्-** निर्वाचनायोगस्य कार्यप्रणालीं प्रति कांग्रेसनेता शशिथरूरः असन्तोषं प्रकटितवान्। मृतानां द्विलक्षं मतदातृणां पुनर्जीवितरूपेण अभिलेखेषु समावेशः कथं जातः इति प्रश्नम् उत्थापितवान्।

९. **महाराष्ट्रम्-** अजितपवारस्य मृत्योः प्रकरणे तटकरे इत्यस्य भूमिकां प्रति शिवसेनानेता कदमः सन्देहं प्रकटितवान्। सः उपमुख्यमन्त्रिपदस्य आकाङ्क्षी आसीदिति आरोपितवान्। राष्ट्रवादी कांग्रेसदलेन तस्य वक्तव्यस्य विरोधः कृत्वा विधिकसूचनां प्रेषयितुं चेतावनी दत्ता।

१०. **आन्ध्रप्रदेशः-** भ्रष्टाचारनियन्त्रणाय मुख्यमन्त्री चन्द्रबाबुनायडुः पञ्चशतरूप्यकाणां मुद्राणां प्रचलनं निरोद्धुं, अङ्कीयमुद्रायाः लघुमुद्राणां च प्रयोगं वर्धयितुं प्रस्तावितवान्।

११. **नवदेहली-** इन्स्टाग्राम तथा फेसबुक इत्यनयोः सामाजिक- माध्यमयोः कृत्रिमबुद्धिप्रौद्योगिक्याः साहाय्येन उपयोक्तृणां वयः परिचेतुं व्यवस्था क्रियते। किशोराणां सुरक्षायै जनवरीमासात् विशेषनियमाः अनिवार्याः भविष्यन्ति। दृश्यावलोकनसमयस्य सीमा अपि निर्धारितं भविष्यति।

१२. **नवदेहली-** डाकघरस्य स्वचालित-धनवितरणयन्त्रेण प्रतिदिनं पञ्चविंशतिसहस्ररूप्यकाणि निष्कासयितुं शक्यन्ते। पञ्च निःशुल्कव्यवहाराणाम् अनन्तरं त्रयोविंशतिरूप्यकाणि शुल्करूपेण देयानि भविष्यन्ति। कोशं सक्रियं स्थापयितुं न्यूनातिन्यूनं पञ्चशतरूप्यकाणि शेषरूपेण स्थापनीयानि।

१३. **चलचित्रजगत्-** रामायणम् इति चलचित्रेण आयसङ्घस्य नूतनः कीर्तिमान् स्थापितः। सोमवासरे १०७ कोटिरूप्यकाणां आयः प्राप्तः। पञ्चसु दिवसेषु चलचित्रस्य कुलायः ६६३ कोटिरूप्यकाणि अतिक्रान्तवान्।

१४. **पर्यावरणम्-** पंजाबस्य फरीदकोटनगरे आतिशबाजीकारणेन वायुप्रदूषणं भयावहस्तरं प्राप्तम्। वायुगुणवत्तासूचकाङ्कः १२८८ अभवत्। उत्तरप्रदेशस्य दशसु नगरेषु वायुप्रदूषणं वर्धितम्। उत्तराखण्डस्य पञ्चसु जनपदेषु वर्षायाः सम्भावना वर्तते।

१५. **क्रीडावार्ता-** भारत-न्यूजीलैण्डयोः तृतीयस्य एकदिवसीयक्रिकेट-क्रीडास्पर्धायां वर्षाकारणात् मुद्रानिक्षेपे विलम्बः अभवत्। रात्रौ अष्टवादने प्रथमः कन्दुकः क्षेप्तव्यः आसीत्। विराट् कोहली न्यूज़ीलैण्डदेशस्य विरुद्धं द्विसहस्रधावनाङ्कान् प्राप्तुं केवलं द्वाविंशतिधावनाङ्कौ अपेक्षते।

१६. **अमेरिकादेशः-** डोनाल्ड ट्रम्पः निर्वाचनपराजयस्य उत्तरदायित्वं इजरायलदेशे आरोपितवान्। अमेरिकीजनाः इजरायलदेशस्य नीतिभिः अप्रसन्नाः सन्तीति सः उक्तवान्। ईरानदेशेन सह युद्धं तथा पेट्रोलियम् पदार्थानां वर्धमानमूल्यम् अपि हानिकारकं जातम् इति तेन कथितम्।

१७. **बाङ्ग्लादेशः-** बाङ्ग्लादेशस्य शासनं पूर्वप्रधानमन्त्रिण्याः शेखहसीनायाः कृते पारपत्रं न प्रदास्यति। मृत्युदण्डादेशस्य कारणेन तां भारतात् बन्दिविनिमयसम्झौतेन स्वदेशं प्रत्यानेतुं प्रयासः भविष्यतीति मन्त्री उक्तवान्।

१८. आर्थिकजगत्- एनवीडिया-कम्पन्याः अंशमूल्ये २२ प्रतिशतं न्यूनता अभवत्। अंशमूल्यं १७२ डॉलरपर्यन्तम् अपतत्। कम्पन्याः प्रमुखस्य जेन्सन हुआङ्गस्य व्यक्तिगतजीवनसम्बद्धाः चर्चाः तथा अमेरिकादेशस्य गुप्तचरसम्बद्धाः आशङ्काः अस्य न्यूनतायाः कारणत्वेन उल्लिखिताः।

कर्मचारिभ्यः तीव्रः आघातः, हिमाचलसर्वकारस्य अपरः आदेशः निर्गतः



हिमसंस्कृतवार्ता — शिमला। हिमाचलप्रदेशस्य सर्वकारीयविभागेषु उच्चतरपदानां विरुद्धं समायोजनं (एडजस्टमेण्ट्) वा अन्य-संवर्गे वेतन-आहरणाय नियुक्तीनां व्यवस्था अधुना न प्रवर्तिष्यते। ईदृशानां नियुक्ति-आदेशानां निरस्तीकरणार्थं राज्यसर्वकारेण आदेशाः निर्गमिताः। कार्मिकविभागस्य संयुक्तसचिवेन नीरजकुमारेण मुख्यसचिवस्य पक्षतः एते लिखिताः निर्देशाः प्रसारिताः। इतः पूर्वं हिमाचल-उच्चन्यायालयेन विभागेषु अन्यस्थानेषु कृतानि प्रतिनियुक्ति-आदेशनानि एकेन आदेशेन निरस्तीकृतानि आसन्। साम्प्रतं सर्वकारेण द्वितीयः आदेशः कृतः। सर्वकारेण स्पष्टनिर्देशाः निर्गमिताः यत् कस्यापि कर्मचारिणः केवलं पदरिक्तितायाः आधारेण उच्चतरे पदे अथवा अन्यसंवर्गस्य पदे पदस्थापनं न विधातुं शक्यते। ईदृशपदानां विरुद्धं कर्मचारिणां वेतन-आहरणेऽपि प्रतिबन्धः आरोपितः।

मुख्यसचिवस्य पक्षतः कार्मिकविभागेन अस्मिन् सन्दर्भे सर्वे प्रशासनिकसचिवाः, विभागाध्यक्षाः, मण्डलायुक्ताः, उपायुक्ताः तथा च मण्डलानां (बोर्ड), निगमानां, विश्वविद्यालयानां, स्वायत्तसंस्थानां च प्रबन्धनिदेशकाः सचिवाश्च प्रति निर्देशाः निर्गताः। सर्वकारस्य ज्ञाने समागतम् अस्ति यत् विविधविभागेषु सङ्घटनेषु च महत्यां संख्यायां स्वीकृतानि पदानि रिक्तानि सन्तीति कृत्वा कर्मचारिणः उच्चतरेषु पदेषु अथवा अन्यसंवर्गस्य पदेषु स्थानान्तरिताः कृत्वा नियोज्यन्ते। न केवलम् एतावदेव, अपि तु तेषां वेतनभुक्तिः अपि तेषामेव उच्चतराणाम् अन्यसंवर्गपदानां वा विरुद्धं क्रियमाणं वर्तते। सर्वकारेण एतत् नियुक्तिनियमानां, सेवानियमानां, संवर्गव्यवस्थायाश्च (कैडर-व्यवस्थायाः) प्रतिकूलं मन्यते। सर्वकारेण तादृशानां सर्वेषां प्रकरणानां व्यापकावलोकनाय (समीक्षायै) निर्देशाः दत्ताः, येषु कर्मचारिणः सम्प्रति उच्चपदेषु, अधिकाधिकदायित्वयुक्तेषु पदेषु अथवा अन्यसंवर्गपदेषु कार्यरताः सन्ति, तेषां वेतनम् अपि तेषामेव पदानां विरुद्धम् आहरणं क्रियते। इयं समीक्षा निर्देशनिर्गमनात् एकमासाभ्यन्तरे एव सम्पूर्णीकरणीया भविष्यति। समीक्षान्तर्गततया सम्बद्धपदस्य स्वीकृतसंख्यायाः, संवर्गस्य स्वीकृतसंख्यायाः, पदस्य उपलब्धतायाः, चयन-नियुक्तीनां च निर्धारितप्रक्रियायाः तथा कर्मचारिणः मूलसंवर्गस्य (मूल-कैडर) परीक्षणं विधास्यते।

रिक्तपदानाम् उपयोगः समायोजनाय न भविष्यति

सर्वकारेण स्पष्टीकृतं यत् यदि समीक्षायां कस्यापि कर्मचारिणः पदस्थापनं नियुक्तिनियमानां विरुद्धं प्राप्स्यते, तर्हि ईदृशी व्यवस्था सद्यःप्रभावेण समापयिष्यते। सम्बद्धः कर्मचारी तस्य मूले स्थायीपदे, मूलकार्यालये, मूलसंवर्गे च प्रतिप्रेषयिष्यते। सर्वकारेण इदमपि विशदीकृतं यत् रिक्तपदानाम् उपयोगः कर्मचारिणां समायोजनाय (एडजस्टमेण्ट्-कृते) कर्तुं न शक्यते। किमपि रिक्तपदं केवलं सम्बद्ध-नियुक्तिनियमेषु निर्धारितायाः प्रक्रियायाः अन्तर्गततया एव पूरयिष्यते। एतेषु निर्देशेषु एका विशिष्टा मुक्तिः अपि प्रदत्ता।

कर्मचारीभविष्यनिधिसङ्गठने (EPFO)

उत्तरदायित्वस्य पारदर्शितायाश्च आवश्यकता, कोटिशः खाताधारकाणां पञ्च प्रमुखाः अपेक्षाः



हिमसंकृतवार्ताः- वृजेशकुमारपाण्डेयः, नवदेहली। कर्मचारीभविष्यनिधिसङ्गठने (EPFO) केवलं सुधारस्य न, अपि तु उत्तरदायित्वस्य प्रशासनिकव्यवस्थायाश्च परिवर्तनस्य आवश्यकता वर्तते। देशस्य कोटिशः कर्मचारीणः स्वजीवनस्य परिश्रमेण अर्जितं धनं भविष्यनिधिखातेषु सञ्चिन्वन्ति। किन्तु यदा तेषां धनराशौ अथवा अभिलेखेषु त्रुटिः उत्पद्यते, तदा तस्याः त्रुटेः संशोधनार्थं कर्मचारिणः बहून् मासान् यावत् कार्यालयानां शिकायतापटलानां च परिक्रमां कर्तुं बाध्यन्ते। कदाचित् आक्षेपाः समाधानं विना एव समाप्ताः क्रियन्ते, कदाचित् अन्यविभागेषु प्रेष्यन्ते, अन्यदा च केवलम् औपचारिकम् उत्तरं प्रदीयते। अतः कर्मचारिणां पुरतः प्रश्नः अस्ति यत् ते स्वसमस्यानां समाधानार्थं कुत्र गच्छेयुः?

भविष्यनिधिखाताधारकानां पञ्च प्रमुखाः अपेक्षाः-

१. प्रत्येकायाः शिकायतायाः ७२ होराभ्यन्तरे समाधानं भवेत् अथवा स्पष्टः कार्यवाहीप्रतिवेदनः प्रदीयेत।

२. वास्तविकसमाधानं विना शिकायतायाः समापनं क्रियते चेत् सम्बन्धिताधिकारिणः उत्तरदायित्वं निश्चितं भवेत्।

३. भविष्यनिध्यभिलेखानां संशोधनार्थं निश्चितः समयावधिः निर्धारितः भवेत्।

४. प्रत्येकशिकायतायाः निष्पक्षतया समुचितं परीक्षणं भवेत्।

५. कर्मचारिभ्यः केवलम् औपचारिकम् उत्तरं न, अपितु वास्तविकं समाधानं प्रदीयेत।

कर्मचारिणः भविष्यनिधिधनं न तु शासनस्य अनुग्रहदानम्, अपि तु तेषां जीवनपर्यन्तस्य परिश्रमस्य सञ्चितं धनम् अस्ति।

अतः कर्मचारीभविष्यनिधिसङ्गठनेन कर्मचारिणां हितसंरक्षणाय, तेषां समस्यासमाधानाय, अभिलेखानां च शुद्धतायै प्रभाविणी व्यवस्था स्थापनीया। कर्मचारी स्वकीयस्य धनस्य अभिलेखानां च संशोधनार्थं कार्यालयानां परिक्रमां कर्तुं बाध्यः न भवेत्।

देशस्य सर्वेषां भविष्यनिधिखाताधारकानां अधिकाररक्षणाय एषा सामूहिकी अपेक्षा अस्ति। अतः एतस्याः जनहितसम्बद्धायाः आवाजः देशस्य सर्वेषु भागेषु प्रसारिता भवेत्। कर्मचारिणां सम्मानः, तेषां धनस्य सुरक्षा, समस्यायाः वास्तविकं समाधानं च प्रशासनस्य प्रमुखं दायित्वम् अस्ति।

पत्रकारितायाः स्वातन्त्र्ये प्रतिबन्धस्य आशङ्का!

चिकित्सालयेषु सत्यं प्रकाशयितुमपि किं शासकीयमान्यता अनिवार्या?



कार्यालय मुख्य चिकित्सा अधिकारी,बाँदा।

पत्रांक-मुचिअ०/अधि०पत्र/सूचना/2026-27/ 2025 दिनांक- 07/11/20

- समस्त अपर मुख्य चिकित्सा अधिकारी/समस्त उप मुख्य चिकित्सा अधिकारी,बाँदा।
- जिला आयुर्वेद अधिकारी,बाँदा।
- जिला कुष्ठ अधिकारी,बाँदा।
- समस्त जनपदीय स्वास्थ्यकर्मी, प्रभारी, आशा एवं जनसुरा बाँदा।
- समस्त प्रभारी चिकित्सा अधिकारी प्राथमिकार्य, पीएचसी, सहुआ, सिंगरामऊ, कमासिन एवं तिन्दवारी बाँदा।
- जिला मलेरिया अधिकारी, बाँदा।
- जिला अस्पताल निवासन अधिकारी,बाँदा।
- जिला कार्यक्रम प्रबन्धक(DPM), बाँदा।

विषय- समस्त प्राण पत्रकारों की सूची प्रेषण के सम्बन्ध में।

उपरोक्त विषयक के सन्दर्भ में आप सभी प्रभारी अधिकारियों को अवगत कराना है कि अधोहस्ताक्षरी द्वारा कार्यालय द्वारा कार्यालय के पत्र संख्या मुचिअ०/अधि०प्रभारी/सूचना/प्राप्ति/2026/10558 दिनांक 31.10.2026 के द्वारा उपनिदेशक सूचना चित्रकूटधाम मण्डल बाँदा से प्रेस मान्यता प्राप्त रजिस्ट्रेशन के सम्बन्ध में सूचना चाही गयी, जिसमें जिला सूचना अधिकारी कार्यालय पत्र निर्देशक सूचना, चित्रकूटधाम परिक्षेत्र बाँदा ने अपने पत्र संख्या 931/उपनिदेश/सूचना/2026-27 दिनांक 02.11.2025 के द्वारा मान्यता प्राप्त पत्रकारों की सूची प्रेषित की गयी है। उक्त सूची इस पत्र के साथ सलग्न संलग्नक होने प्रेषित की जा रही है।

अतः उक्त के क्रम में आप सभी प्रभारी अधिकारियों को निर्देशित किया जाता है कि सलग्नता प्राप्त सूची में दर्ज पत्रकारों के अतिरिक्त यदि कोई स्वयंभू पत्रकार/यूट्यूबर अपने को पत्रकार बताते हुए किसी भी प्रकार की अभ्यर्थित मांग का प्रयोग करता है अथवा धोखे या गलियत जानकारी के तो उसके विरुद्ध तत्काल वैधानिक कार्यवाही कराना सुनिश्चित करें।

संलग्नक-उपरोक्तानुसार

1. बाँदा जनपद के प्रेस मान्यता प्राप्त पत्रकारों की सूची 2026

मुख्य चिकित्सा अधिकारी
बाँदा।

हिमसंस्कृतवार्ताः- वृजेशकुमारपाण्डेयः

बाँदा-जनपदे मुख्यचिकित्साधिकारी-कार्यालयस्य पत्रेण पत्रकारितायाः स्वातन्त्र्यं प्रति गम्भीराः प्रश्नाः उत्पन्नाः। प्राप्तविवरणानुसारं मुख्यचिकित्साधिकारी- कार्यालयेन केवलं पञ्चदश मान्यताप्राप्तानां पत्रकाराणां सूची प्रेषिता अस्ति। अन्ये पत्रकाराः यदि चिकित्सालयेषु छायाचित्राणि अथवा दृश्यचित्राणि निर्मास्यन्ति, तर्हि तेषां विरुद्धं कार्याचरणं भविष्यतीति सचेतना अपि प्रदत्ता इति कथ्यते। अत्र प्रश्नः उदेति यत् किं शासकीयमान्यतैव पत्रकारितायाः प्रमाणपत्रम्? चिकित्सालयेषु विद्यमानाः अव्यवस्थाः, रोगिणां कष्टानि, स्वास्थ्यविभागस्य च प्रमादकतां प्रकाशयितुं स्थानीयपत्रकाराः अपि अधुना स्वस्य चित्रग्राहकयन्त्रं गृहीत्वा पूर्वानुमतिं प्रार्थयिष्यन्ति किम्? चिकित्सालयाः जनसामान्यस्य हिताय निर्मिताः सार्वजनिकसंस्थाः सन्ति, न तु कस्यचित् विभागस्य निजीसम्पत्तिः। नियमव्यवस्थानां नाम्ना पत्रकारितायाः स्वातन्त्र्ये प्रतिबन्धः आरोपयितुं न उचितम्। अपि तु चिकित्सालयेषु विद्यमानानाम् अव्यवस्थानां निराकरणं, रोगिणां समस्यासु समाधानं तथा स्वास्थ्यविभागस्य उत्तरदायित्वं सुनिश्चितं कर्तव्यम्।

लोकतन्त्रे पत्रकारिता जनहितस्य सशक्तं माध्यमम् अस्ति। अतः पत्रकाराणां स्वातन्त्र्यस्य रक्षणं तथा प्रशासनस्य उत्तरदायित्वस्य निर्धारणं सर्वथा आवश्यकम्।

पङ्कजराय-महोदयः सञ्जातः हिमाचल-विद्युद्-नियामक-आयोगस्य अध्यक्षः, ऊर्जा-विभागेन निर्गमिता अधिसूचना





हिमसंस्कृतवार्ता शिमला। हिमाचलप्रदेशसर्वकारेण ज्येष्ठः भारतीय-प्रशासनिक-सेवा (IAS) अधिकारी पङ्कजराय-महोदयः हिमाचलप्रदेश-विद्युद्-नियामक-आयोगस्य (HPERC) नूतनाध्यक्षरूपेण नियुक्तः। ऊर्जाविभागेन मङ्गलवासरे सायं काले अस्मिन् सन्दर्भे अधिसूचना निर्गमिता। पङ्कजराय-महोदयस्य नियुक्तिः पञ्चवर्षाणि अथवा पञ्चषष्टिवर्षायुः (६५) प्राप्नोति इति पर्यन्तं (यद् उभयोः पूर्वं स्यात्) कृता अस्ति। पङ्कजराय-महोदयः प्रदेशस्य तीक्ष्णमतिषु अनुभवि-प्रशासनिक-अधिकारिषु गण्यते। सः बिलासपुर-लाहौल-स्पीती-मण्डलयोः उपायुक्तरूपेण सेवाः समर्पितवान् अस्ति। एतदतिरिच्य सः शिमला-नगरनिगमस्य आयुक्तः, 'राष्ट्रिय-स्वास्थ्य-अभियानस्य' (NHM) अभियान-निदेशकश्च अपि आसीत्। सः चण्डीगढस्थस्य 'पीजीआई' (PGI) संस्थानस्य उपनिदेशक (प्रशासनम्) पदेऽपि नियुक्तः अभवत्। विद्युद्-नियामक-आयोगस्य अध्यक्षपदे नियुक्तेः प्रकरणं दीर्घकालात् चर्चायाः विषयः आसीत्। हिमाचलप्रदेश-उच्चन्यायालयेन अचिरमेव अस्मिन् प्रकरणे महत्त्वपूर्णं निर्णयं श्रावयता राज्यसर्वकारस्य सः निर्णयः निरस्तः कृतः आसीत्, येन चयनसमित्या प्रेषितं नामपटलं (पैनल) प्रत्याख्यातम् आसीत्।

वस्तुतः, चयनसमित्या १४ सितम्बर २०२५ दिनाङ्के अध्यक्षपदार्थम् आइएएस-अधिकारिणः पङ्कजरायस्य राजीवसूदस्य च नाम्नोः संस्तुतिः (अनुशंसा) कृता आसीत्। नामपटलस्य निरस्तीकरणस्य निर्णयं पङ्कजराय-महोदयः उच्चन्यायालये प्रत्याहूतवान् आसीत्। तस्य याचिकायां श्रवणं कुर्वता न्यायालयेन चयनसमित्याः संस्तुतेः आधारेणैव नियुक्तिप्रक्रियां समापयितुं निर्देशाः प्रदत्ताः। न्यायालयेन सर्वकाराय १० नवम्बर् २०२६ दिनाङ्कं यावत् नियुक्तिप्रक्रियां सम्पूर्णीकर्तुं समयावधिः दत्ता आसीत्। साम्प्रतं सर्वकारेण पङ्कजराय-महोदयम् आयोगस्य अध्यक्षरूपेण नियुज्य इयं प्रक्रिया सम्पूर्णा कृता।

भठवांमठे गोवर्धनपूजावसरे श्रीठाकुरभगवद्भ्यः षट्पञ्चाशद्भोगाः समर्पिताः



हिमसंस्कृतवार्ताः- डॉ विमलेश झा, भठवांमठः,गोपालगंजः।

गोवर्धनपूजायाः अन्नकूटमहोत्सवस्य च पावनावसरे बिहारराज्यस्य गोपालगंजजनपदस्य विभिन्नेषु देवालयेषु भक्तिमयः वातावरणः आसीत्। विभिन्नेषु मन्दिरेषु भगवान् श्रीकृष्णः विविधैः व्यञ्जनैः, मिष्टान्नैः, फलैः, पक्वान्नैश्च निर्मितैः षट्पञ्चाशद्भोगैः पूजितः। प्रसादग्रहणार्थं भक्तानां महती सम्मर्दः दृश्यते स्म। अस्मिन् एव जनपदे पञ्चदेवरी प्रखण्डस्य भठवांमठे मङ्गलवासरे गोवर्धनपूजायाः अन्नकूटमहोत्सवस्य च भव्यं आयोजनं कृतम्। अस्मिन् पावनावसरे भगवान् श्रीकृष्णाय श्रीठाकुरजीभ्यश्च षट्पञ्चाशत्प्रकारकाणि व्यञ्जनानि, मिष्टान्नानि, फलानि, पक्वान्नानि च भक्तिभावेन समर्पितानि। प्रातःकालादेव भगवतः दर्शनार्थं भक्तानां दीर्घा पङ्क्तिः मन्दिरपरिसरे दृश्यते स्म। श्रद्धालुभिः दुग्धेन, मधुना, घृतेन, सहस्राष्टतीर्थजलैः, विविधफलरसैः, पुष्पैश्च गिरिराजशिलायाः अभिषेकः कृतः। ततः भगवान् श्रीकृष्णः षट्पञ्चाशद्भोगैः पूजितः।

गोवर्धनकथायाः श्रवणेन, भजनकीर्तनैः, नृत्यैश्च मन्दिरपरिसरः भक्तिरसपूर्णः अभवत्। श्रद्धालवः भक्तिभावेन गिरिराजस्य परिक्रमां कृत्वा श्रीठाकुरजीं समाराधितवन्तः। अन्ते अन्नकूटभण्डारे सहस्राधिकैः श्रद्धालुभिः भोजनप्रसादः गृहीतः। महोत्सवस्य शुभारम्भः गोवर्धनशिलायाः अभिषेकेण पूजनेन च अभवत्। ततः गोवर्धनमहात्म्यस्य भगवान् श्रीकृष्णस्य गोवर्धनलीलायाश्च विस्तृतं वर्णनं कृतम्। मन्दिरपरिसरे दिवसभरं भक्तिः, श्रद्धा, उत्साहश्च व्याराजन्त। अस्मिन् धार्मिके आयोजने आचार्यः अर्घेन्दुब्रह्मचारी, भठवांनगरस्य पूर्वमुखिया उपेन्द्रमिश्रः प्रमुखभूमिकां निर्वहन्तौ आस्ताम्। अनन्तश्रीविभूषितः सन्तः विशम्भरदासजीमहाराजः गोवर्धनकथां श्रावयन् अवदत् यत् भगवान् श्रीकृष्णः सप्तवर्षीयः सन् सप्तकोसपरिमितं गोवर्धनपर्वतं सप्तदिनानि यावत् स्वाङ्गुल्यां धारितवान्। अस्यां दिव्यलीलायां भगवान् प्रकृतेः, गोमातुः, गोवर्धनपर्वतस्य च सम्मानस्य महत्त्वं प्रतिपादितवान्। सः अवदत् यत् नन्दबाबा यशोदामाता च गोपूजायाः, ब्राह्मणपूजायाः, गिरिराजगोवर्धनस्य पूजायाश्च प्रेरणां दत्तवन्तौ। गोवर्धनपूजायाः मूलसन्देशः प्रकृतेः संरक्षणम्, गोसेवा, भक्तिः, कृतज्ञता च अस्ति। सन्तः श्रद्धालून् अधिकाधिकं "हरे कृष्ण" महामन्त्रस्य जपं कर्तुं तथा श्रीमद्भगवद्गीतायाः नियमितं स्वाध्यायं कर्तुं च आग्रहं कृतवान्। गोवर्धनपूजामहोत्सवस्य समापनम् अन्नकूटभण्डारेण अभवत्। अस्मिन् भण्डारे सहस्राधिकाः श्रद्धालवः भोजनप्रसादं गृहीतवन्तः। सम्पूर्णे मठपरिसरे भक्तिभावः, धार्मिकोत्साहः, आनन्दश्च व्याप्तः आसीत्। अयं महोत्सवः भक्तानां कृते आध्यात्मिकानन्दस्य, सामूहिकभक्तेः, सनातनधर्मपरम्परायाः च अनुपमः अवसरः अभवत्।





भव्यस्य श्रीरामकथा-महोत्सवस्य सज्जतार्थं कर्मयोगिपरिवारस्य सभा सम्पन्ना



हिमसंस्कृतवार्ताः- वृजेशकुमारपाण्डेयः,

सिद्धार्थनगरम्। आगामी दिसम्बरमासस्य द्वितीयदिनाङ्कात् एकादशदिनाङ्कपर्यन्तं डुमरियागञ्ज- विधानसभाक्षेत्रान्तर्गते भारतभारी-नगरपञ्चायतस्य भरतेश्वरनाथमहादेवमन्दिरे, भारतभारीधाम्नि च आयोज्यमानायाः भव्यायाः 'सनातनघोषः श्रीरामकथा' इत्याख्यायाः धार्मिककार्यक्रमस्य सफलायोजनाय अद्य स्वीयेन कर्मयोगिपरिवारेण सह सभा आयोजिता। अस्मिन् सभायां कार्यक्रमस्य विस्तृतकार्ययोजना निर्मिता। आयोजनस्य विभिन्नव्यवस्थानां, कार्यविभागानां, दायित्वानाम्, आवश्यकसज्जतानां विषये सर्वैः कर्मयोगिभिः सह विस्तृतं सार्थकं च विचारविमर्शः कृतः। प्रभुश्रीरामस्य अनुग्रहेण सर्वेषां सहयोगेन च अयं धार्मिकमहोत्सवः भव्यः, दिव्यः, ऐतिहासिकश्च भवेत् इति मङ्गलकामना अभिव्यक्ता।

इटवानगरे भाजपायाः सङ्गठनात्मकसभा सम्पन्ना, सङ्गठनसुदृढीकरणस्य भावियोजनानां च विषये विचारविमर्शः

हिमसंस्कृतवार्ताः- वृजेशकुमारपाण्डेयः,

सिद्धार्थनगरम्। इटवाविधानसभाक्षेत्रस्य ३०५-सङ्ख्यकक्षेत्रान्तर्गते नगरपञ्चायत-इटवानगरकार्यालये भारतीयजनतापार्टी (भाजपा) इत्यस्य सङ्गठनात्मकसभा आयोजिता। सभा सिद्धार्थनगरजनपदस्य प्रभारी प्रवीणगुप्तस्य तथा जिलाध्यक्षस्य दीपकमौर्यस्य नेतृत्वे सम्पन्ना।

सभायां भाजपानेता जयवर्धनतिवारी, वरिष्ठभाजपानेता माधवयादवः, सागरचौधरी च सहिताः दलस्य अन्ये वरिष्ठनेतारः, मतदानकेन्द्राध्यक्षाः, कार्यकर्तारः उपस्थिताः आसन्। सभायां सङ्गठनस्य अधिकाधिक-सुदृढीकरणाय, मतदानकेन्द्रस्तरे कार्यकर्तॄणां सक्रियतावर्धनाय, दलस्य नीतिनां कार्यक्रमाणां च जनसामान्यं प्रति प्रसारणाय च विस्तृतः विचारविमर्शः अभवत्। अवसरेऽस्मिन् सर्वैः पदाधिकारिभिः कार्यकर्तृभिश्च सङ्गठनस्य सुदृढीकरणाय परस्परसहयोगेन एकतया च कार्यं कर्तुं सङ्कल्पः कृतः।

दशदिवसीय-संस्कृतसम्भाषण-वर्गस्य सम्पूर्तिसत्रं सम्पन्नम्



संस्कृतस्य व्यवहारिकप्रयोगाय प्रतिभागिनां समर्पणम्—विद्वद्भिः संस्कृतप्रचारस्य विविधाः मार्गाः प्रतिपादिताः

हिमसंस्कृतवार्ताः। सत्येन्द्रपाठकः, लखनऊ।
संस्कृतसंस्कृतिविकाससंस्थानस्य उत्तरप्रदेश-न्यासस्य तत्त्वावधाने "सरलं संस्कृतम्—संस्कृतेन सम्भाषणम्" इति ध्येयेन आयोजितस्य दशदिवसीयस्य ऑनलाइन-संस्कृतसम्भाषणवर्गस्य सम्पूर्तिसत्रं मङ्गलवासरे सायं ७:३० वादने गूगलमीट्-माध्यमेन सम्पन्नम्। कार्यक्रमस्य प्रारम्भः श्रीप्रिन्शुक्लेन प्रस्तुतमङ्गलाचरणेन अभवत्। ततः सुश्रीशिवामिश्रया कुलगीतं प्रस्तुतम्। सुश्रीशिखामिश्रया स्वागतभाषणं प्रदत्तम्।मुख्यातिथिः डॉ. भारतभूषणरथः स्ववक्तव्ये संस्कृतस्य प्रचार-प्रसारस्य विविधान् मार्गान् निर्दिश्य योगस्य ज्योतिषस्य च माध्यमेन संस्कृतप्रसारस्य आवश्यकतां प्रतिपादितवान्। सः अवदत् यत् संस्कृतम् एकमेव सुदृढा भाषा अस्ति, या "वसुधैव कुटुम्बकम्" इति भावनया सम्पूर्णस्य विश्वस्य कल्याणं चिन्तयति। संस्कृतभाषायै समर्पणस्य आह्वानं कुर्वन् सः अवदत्—"संस्कृताय जीवत, संस्कृताय व्याधिताः भवत।"मुख्यवक्ता श्रीदेवेशविद्यार्थी "संस्कृतसम्भाषणशिविरं किमर्थं करणीयम्?" इति प्रश्नस्य उत्तरं स्ववक्तव्येन प्रदत्तवान्। सः अवदत् यत् ये सम्भाषणशिविरं न गच्छन्ति, ते तस्य महत्त्वस्य कल्पनामपि कर्तुं न शक्नुवन्ति; ये शिविरं गच्छन्ति, ते संस्कृतयात्रायाः प्रथमसोपाने भवन्ति। भारतीयपरम्परायाः महत्त्वं प्रतिपादयन् सः अवदत् यत् अस्माकं समीपे ज्ञानस्य विशालः भण्डारः अस्ति, तस्य सम्यक् प्रयोगः कथं करणीयः इति ज्ञातव्यम्।कार्यक्रमाध्यक्षया डॉ. वीणामिश्रा स्वोद्बोधने संस्कृतं दैनन्दिनव्यवहारे आनेतुं प्रतिभागिनः प्रेरितवती। संस्कृतस्य प्रचार-प्रसाराय तस्य व्यवहारिकप्रयोगस्य आवश्यकतां प्रतिपादयन्ती सा अवदत् यत् वर्तमानसमये संस्कृतशिक्षणस्य समुचिता शिक्षापद्धतिः सर्वत्र पर्याप्तरूपेण उपलब्धा नास्ति। अतः संस्कृतं केवलं पाठ्यविषयरूपेण न स्वीकृत्य व्यवहारस्य भाषारूपेण अपि विकसितव्यम्।संस्थानस्य संरक्षकः पूजनीयः कुलगुरुः प्रो. राधागोविन्दत्रिपाठी
संस्कृतसंस्कृतिविकाससंस्थानस्य पक्षतः सर्वेभ्यः प्रतिभागिभ्यः आयोजकेभ्यश्च आशीर्वचनं प्रदत्तवान्। सः संस्कृतस्य संरक्षणाय, संवर्धनाय, प्रचार-प्रसाराय च सर्वान् प्रोत्साहितवान् तथा संस्कृतसेवायै निरन्तरं प्रयत्नशीलाः भवितुम् आह्वानं कृतवान्।कार्यक्रमे वंशशर्मणा, शालिनीशुक्लया, अञ्जलिना, विवेकमिश्रेण, सूरजत्रिपाठिना तथा डॉ. शैलेशकुमारेण वर्गसम्बद्धानां स्वानुभवानां कथनं कृतम्। ततः लक्ष्म्या संस्कृतगीतं प्रस्तुतम्।कार्यक्रमस्य आयोजनाध्यक्षा डॉ. सुमनमिश्रा, संयोजकः श्रीसत्येन्द्रपाठकः 'शास्त्री' च आस्ताम्। कार्यक्रमस्य सञ्चालनम् अञ्जलिना कृतम् तथा अन्ते यशशर्मणा शान्तिपाठः प्रस्तुतः।दशदिनपर्यन्तं सञ्चालितेऽस्मिन् ऑनलाइन-संस्कृतसम्भाषणवर्गे प्रतिभागिभिः संस्कृतेन सम्भाषणस्य व्यावहारिकः अभ्यासः कृतः। सम्पूर्तिसत्रे विद्वद्भिः प्रदत्तं मार्गदर्शनं, प्रतिभागिनां अनुभवकथनानि तथा संस्कृतस्य प्रति तेषाम् उत्साहः विशेषाकर्षणम् अभवत्।

शिक्षाक्षेत्रे रोजगारक्षेत्रे च संस्कृतशिक्षायाः उपयोगिता आवश्यकता च



हिमसंस्कृतवार्ताः- लखनऊम्। वर्तमानकाले शिक्षाक्षेत्रे रोजगारक्षेत्रे च संस्कृतशिक्षायाः महत्त्वं, उपयोगिता, आवश्यकता च निरन्तरं वर्धमाना अस्ति। संस्कृतभाषा न केवलं प्राचीन- भारतीय-ज्ञानविज्ञानस्य अमूल्यनिधिः अस्ति, अपि तु आधुनिकशिक्षायाः, अनुसन्धानस्य, रोजगारस्य च महत्त्वपूर्णम् आधारभूतं साधनम् अपि अस्ति।
संस्कृतभाषायां भारतीयसंस्कृतेः, दर्शनस्य, साहित्यस्य, आयुर्वेदस्य, योगशास्त्रस्य, गणितस्य, ज्योतिषशास्त्रस्य च विपुलं ज्ञानभाण्डारं निहितम् अस्ति। संस्कृताध्ययनेन विद्यार्थिनां बौद्धिकक्षमता, स्मरणशक्तिः, तार्किकचिन्तनशक्तिः, भाषाकौशलं विकसितं भवति। शिक्षाक्षेत्रे संस्कृतशिक्षायाः माध्यमेन संस्कृतशिक्षकत्वस्य, प्राध्यापकत्वस्य, शोधकार्यस्य, अनुवादकार्यस्य च अनेकाः सम्भावनाः सन्ति। रोजगारक्षेत्रे अपि संस्कृतज्ञानिनां कृते शिक्षणसंस्थासु, विश्वविद्यालयेषु, अनुसन्धानकेन्द्रेषु, पाण्डुलिपि- संरक्षणक्षेत्रे, प्रकाशनक्षेत्रे, अनुवादक्षेत्रे च विविधाः अवसराः उपलब्धाः भवन्ति। अतः संस्कृतशिक्षायाः व्यापकप्रचारः, प्रसारः, संरक्षणं, संवर्धनं च समयस्य महती आवश्यकता अस्ति। विद्यालयेषु महाविद्यालयेषु च संस्कृतशिक्षायाः समुचितव्यवस्था भवेत्, संस्कृतच्छात्रेभ्यः रोजगारस्य नवीनाः अवसराः च प्रदीयेरन् इति अपेक्षा अस्ति। वृजेशकुमारपाण्डेयः, प्रदेशसङ्गठनमन्त्री, उत्तरप्रदेशसंस्कृतशिक्षकसङ्घः, अवदत् यत् संस्कृतभाषा भारतीयज्ञानपरम्परायाः आधारशिला अस्ति। संस्कृतशिक्षायाः संवर्धनेन न केवलं सांस्कृतिकमूल्यानां संरक्षणं भविष्यति, अपितु युवानां कृते शिक्षायां रोजगारक्षेत्रे च नवीनाः सम्भावनाः अपि उद्घाटिताः भविष्यन्ति। अतः संस्कृतभाषायाः अध्ययनं, अध्यापनं तथा प्रचारप्रसारः सर्वेषां सामूहिकं दायित्वम् अस्ति।

फरेंदा-विधानसभाक्षेत्रे सङ्गठनात्मकसंगोष्ठ्याः आयोजनम्, सङ्गठनस्य सुदृढीकरणविषये सार्थकचर्चा अभवत्।

हिमसंस्कृतवार्ताः- वृजेशकुमारपाण्डेयः, महराजगञ्जम्। फरेंदा-विधानसभाक्षेत्रे आयोजितायां महत्त्वपूर्णायां सङ्गठनात्मकसभायां मुख्यातिथिरूपेण सम्मिलितः भूत्वा मुख्यातिथिना उपस्थितैः पदाधिकारिभिः कार्यकर्तृभिश्च सह सङ्गठनसम्बद्धविषयेषु सार्थकं विचारविमर्शः कृतः। अस्याः सभायाः अध्यक्षता विधानसभाप्रभारी डॉ. आर.डी. सिंह-महोदयेन कृता। अस्मिन् अवसरे पूर्वजिलाध्यक्षः अरुण शुक्लः, समीर त्रिपाठी, पूर्वविधायकः बजरंग बहादुर सिंहः, विवेक पाण्डेयः, शैलेश पाण्डेयः, पिछड़ावर्गमोर्चायाः जिलाध्यक्षः वीरेन्द्र चौहानः, किसानमोर्चायाः जिलाध्यक्षः हृदय कुमार उपाध्यायः, पूर्वजिलामन्त्री बच्चूलाल चौरसिया, विष्णुदेव चौरसिया च सहिताः अनेके वरिष्ठाः पदाधिकारिणः कार्यकर्तारश्च उपस्थिताः आसन्। सभायाः कुशलं सञ्चालनं जिलामहामन्त्रिणाअश्वनी सिंह-महोदयेन कृतम्। अस्मिन् अवसरे वक्तृभिः उक्तं यत् सङ्गठनस्य सुदृढीकरणमेव अस्माकं सर्वश्रेष्ठं बलम् अस्ति। सङ्गठनस्य एकता, समर्पणभावना, सामूहिकप्रयत्नाश्च एव सफलतायाः आधाराः भवन्ति। अतः सर्वैः कार्यकर्तृभिः सङ्गठनस्य सुदृढीकरणाय पूर्णनिष्ठया कार्यं करणीयम्।

पूर्वं मतदातृसूच्यां पञ्जीकृताः मतदातारः निःशङ्कं पूरयन्तु षष्ठम् आवेदनपत्रम्

निर्वाचनायोगस्य महत्त्वपूर्णः निर्देशः


Form No. DIR-6

[Pursuant to rule 12 (1) of the Companies (Appointment and Qualification of Directors) Rules, 2014 & Rule 10 of Limited Liability Partnership Rules, 2009]

Intimation of change in particulars of Director/ Designated partner to be given to the Central Government

Form Language ◉ English ○ Hindi

Note -
- All fields marked in * are to be mandatorily filled.
- In case of Indian nationals, Income-tax Permanent Account Number (Income-tax PAN) is mandatory in all cases even if there is no change in Income-tax PAN. In such cases, director details should be as per Income-tax PAN. In case the details as per Income-tax PAN are incorrect, director/ designated partner is advised to first correct the details in Income-tax PAN.Refer instruction kit for details

1(a)* Director Identification Number (DIN/DPIN) Pre-fill

हिमसंस्कृतवार्ताः- वृजेशकुमारपाण्डेयः, लखनऊ। उत्तरप्रदेशस्य मुख्यनिर्वाचनाधिकारि-कार्यालयात् निर्गता विज्ञप्तिः। भारतीयनिर्वाचनायोगेन विशेषगहनपुनरीक्षणात् पूर्ववर्तिन्यां मतदातृसूच्यां पञ्जीकृतानां, किन्तु वर्तमानमतदातृसूच्यां नाम अनन्तर्भूतानां मतदातॄणां कृते महत्त्वपूर्णाः निर्देशाः निर्गताः। आयोगस्य निर्देशानुसारं ये मतदातारः पूर्वं मतदातृसूच्यां पञ्जीकृताः आसन्, किन्तु वर्तमानसूच्यां तेषां नाम न विद्यते, ते मतदातृसूच्यां स्वनाम समावेशयितुं निःशङ्कं षष्ठम् आवेदनपत्रं पूरयित्वा समर्पयितुं शक्नुवन्ति। एतादृशैः पूर्वपञ्जीकृतैः मतदातृभिः षष्ठम् आवेदनपत्रं समर्पिते सति केवलं पूर्वपञ्जीकरणस्य आधारेण लोकप्रतिनिधित्वाधि-नियमस्य १९५० तमस्य वर्षस्य एकत्रिंशत्तमायाः धारायाः अन्तर्गतं तेषां विरुद्धं किमपि दण्डात्मकं कार्यं न भविष्यति। अस्य निर्देशस्य अनुपालनार्थं प्रदेशस्य सर्वेभ्यः जिलानिर्वाचनाधिकारिभ्यः आवश्यकाः आदेशाः प्रदत्ताः। एते निर्देशाः निर्वाचक- नामपञ्जीकरण- अधिकारिभ्यः, सहायक- निर्वाचक- नामपञ्जीकरण-अधिकारिभ्यः, अन्यसम्बद्धाधिकारिभ्यः अपि ज्ञापनीयाः इति निर्देशितम्। विभिन्नसञ्चारमाध्यमैः अस्य व्यापकः प्रचारः प्रसारश्च करणीयः।विशेष-गहनपुनरीक्षणम्-२०२६ पूर्वं मतदातृसूच्यां नामाङ्कितः कोऽपि नागरिकः यदि वर्तमानमतदातृसूच्यां स्वनाम न पश्यति, तर्हि निर्धारितप्रक्रियामनुसृत्य षष्ठम् आवेदनपत्रं निःशङ्कं समर्पयितुं शक्नोति। आवेदनपत्रे प्रथमवारं मतदातृसूच्यां नामसमावेशसम्बद्धायाः घोषणायाः कारणेन केषाञ्चन पूर्वपञ्जीकृतमतदातॄणां मनसि आशङ्का उत्पन्ना आसीत्। आयोगेन स्पष्टं कृतं यत् केवलं पूर्वपञ्जीकरणस्य कारणेन मिथ्याघोषणायाः आरोपेण तेषां विरुद्धं एकत्रिंशत्तमायाः धारायाः अन्तर्गतं कार्यवाही न भविष्यति। किन्तु एषा सुविधा तदैव मान्या भविष्यति, यदा सम्बन्धितमतदातुः नाम अन्यस्मिन् कस्मिन्नपि विधानसभानिर्वाचनक्षेत्रस्य मतदातृसूच्यां पूर्वतः पञ्जीकृतं न स्यात् तथा षष्ठे आवेदनपत्रे कृता तस्य घोषणा अन्येषु सर्वेषु विधिकदृष्ट्या नियमानुकूलाऽपि स्यात्। अतः प्रदेशस्य सर्वेभ्यः योग्यनागरिकेभ्यः अनुरोधः क्रियते यत् ते वर्तमानमतदातृसूच्यां स्वनाम अवश्यं परीक्षन्ताम्। यदि पूर्वं तेषां नाम पञ्जीकृतमासीत्, किन्तु वर्तमानसूच्यां न समाविष्टम् अस्ति, तर्हि ते निर्भयतया निःशङ्कं च षष्ठम् आवेदनपत्रं समर्प्य मतदातृसूच्यां स्वनाम समावेशयितुं आवेदनं कुर्वन्तु।

- मुख्यनिर्वाचनाधिकारिकार्यालयः, उत्तरप्रदेशः।

अररिया महाविद्यालये षड्दिवसीयः शिक्षकविकासकार्यक्रमः आयोजयिष्यते



हिमसंस्कृतवार्ताः- डॉ. विमलेश झा, अररिया, बिहार। बिहारराज्यस्य अररियामहाविद्यालये नवम्बरमासस्य ३० दिनाङ्कतः दिसम्बरमासस्य ५ दिनाङ्कपर्यन्तं षड्दिवसीयस्य शिक्षकविकास-कार्यक्रमस्य आयोजनं भविष्यति। बाबासाहेबभीमराव- अम्बेडकर- बिहारविश्व-विद्यालयस्य, मुजफ्फरपुरनगरस्य यूजीसी-मालवीय- मिशन- शिक्षकप्रशिक्षणकेन्द्रस्य तत्त्वावधाने आयोजितेऽस्मिन् कार्यक्रमे स्थायिविकासलक्ष्याणि, जलवायुपरिवर्तनम्, आपदाव्यवस्थापनं च इत्येतेषु महत्त्वपूर्णेषु विषयेषु गम्भीरः विचारविमर्शः भविष्यति। अस्य शिक्षकविकासकार्यक्रमस्य मुख्यविषयः "स्थायिविकासलक्ष्याणि, जलवायुपरिवर्तनम्, आपदाश्च" इति विषयाः निर्धारिताः सन्ति। षड्दिनात्मकस्य अस्य कार्यक्रमस्य अन्तर्गतं निर्दिष्टविषयसम्बद्धानां नवीनशैक्षणिकज्ञानानां विविधपक्षाणां च परिचर्चा भविष्यति। अनेन कार्यक्रमेण प्रतिभागिनां शिक्षकाणां विषयसम्बद्धं ज्ञानं समृद्धं भविष्यति, तेषां शिक्षणकौशलस्य अनुसन्धानक्षमतायाश्च विकासः सम्भविष्यति। अस्मिन् कार्यक्रमे विश्वविद्यालयस्य सर्वेषु सम्बद्धमहाविद्यालयेषु कार्यरताः सहायकाचार्याः, सहाचार्याः, आचार्याः, अतिथिशिक्षकाश्च भागं ग्रहीतुं शक्नुवन्ति। राज्यस्य विभिन्नमहाविद्यालयेभ्यः आगताः शिक्षकाः अपि अस्मिन् कार्यक्रमे सहभागितां कर्तुं शक्नुवन्ति। कार्यक्रमस्य पञ्जीकरणप्रक्रिया प्रारब्धा अस्ति। इच्छुकाः शिक्षकाः पञ्जीकरणं कृत्वा अस्मिन् ज्ञानवर्धके कार्यक्रमे भागं ग्रहीतुं शक्नुवन्ति। आयोजकानां मते अयं कार्यक्रमः शिक्षकाणां शैक्षणिकव्यावसायिकविकासस्य दृष्ट्या अत्यन्तम् उपयोगी भविष्यति। नवीनशैक्षणिकज्ञानस्य प्राप्तिः, अनुसन्धानकौशलस्य संवर्धनम्, अध्यापनक्षमतायाः विकासश्च अस्य कार्यक्रमस्य प्रमुखानि उद्देश्यानि सन्ति। शिक्षकाणां वृत्तिविकासस्य पदोन्नतेश्च दृष्ट्या अपि एतादृशाः कार्यक्रमाः महत्त्वपूर्णाः मन्यन्ते।

अस्य प्रतिष्ठितस्य कार्यक्रमस्य आयोजनस्वीकृतिः अररिया महाविद्यालयस्य प्राचार्यस्य प्रो. (डॉ.) रामदयालपासवानमहोदयस्य विशेषप्रयत्नैः प्राप्ता। तस्य प्रयत्नेन महाविद्यालयाय षड्दिवसीयस्य शिक्षकविकासकार्यक्रमस्य आतिथेयत्वस्य अवसरः प्राप्तः। एषा उपलब्धिः महाविद्यालयपरिवारस्य कृते गौरवस्य विषयः अस्ति। अस्य कार्यक्रमस्य संयोजकत्वेन डॉ. राजेशमोहनः नियुक्तः अस्ति। डॉ. हमीदरजाअख्तरः, डॉ. सन्देशयादवः च सहसंयोजकत्वस्य दायित्वं निर्वहिष्यतः।

कार्यक्रमस्य पञ्जीकरणप्रक्रिया प्रारब्धा अस्ति। इच्छुकाः शिक्षकाः पञ्जीकरणं कृत्वा अस्मिन् षड्दिवसीये शिक्षकविकासकार्यक्रमे सहभागितां कर्तुं शक्नुवन्ति। अररिया महाविद्यालये अस्य कार्यक्रमस्य आयोजनं जनपदस्य शैक्षणिकक्षेत्रे नूतनां प्रतिष्ठां वर्धयिष्यति इति आशा क्रियते। शिक्षकाणां ज्ञानविकासाय, कौशलसंवर्धनाय, शैक्षणिकगुणवत्तावर्धनाय च अयं कार्यक्रमः महत्त्वपूर्णं योगदानं प्रदास्यति।

बालकैः निर्मितैः वर्णवर्णैः दीपैः विद्यालयः प्रकाशमानः अभवत्।

हिमसंस्कृतवार्ताः- वृजेशकुमारपाण्डेयः, आजमगढम्। उत्तरप्रदेशस्य आजमगढमण्डले महाराजगञ्जविकासखण्डे स्थिते देवारा तुर्कचारा-संयुक्तविद्यालये दीपावलीपर्वणः पावनावसरे छात्रैः स्वप्रतिभायाः सृजनात्मकतायाश्च सुन्दरं प्रदर्शनं कृतम्। अस्मिन् अवसरे बालकैः स्वहस्तैः सुन्दराः विविधवर्णयुक्ताः दीपाः निर्मिताः। तेषां कलात्मककौशलं कल्पनाशक्तिश्च विशेषतया प्रशंसनीया आसीत्। एतया क्रियाकलापेन छात्रेभ्यः स्वकल्पनानां साकाररूपप्रदानस्य, कलाकौशलस्य विकासस्य, भारतीयपर्वणां सांस्कृतिकपरम्पराणां च परिचयस्य सुअवसरः प्राप्तः। उत्तरप्रदेशस्य आधारभूत- शिक्षाविभागः छात्राणां सृजनात्मक- प्रतिभायाः प्रोत्साहनाय, शिक्षायाः आनन्दमयम् अनुभवनिष्ठं च स्वरूपं निर्मातुं निरन्तरं प्रयत्नशीलः अस्ति। एवं बालकैः निर्मितैः दीपैः विद्यालयः प्रकाशमयः अभवत्, छात्राणां प्रतिभा च सर्वेषां मनांसि आकर्षितवती।





शिखा मिश्रा
संस्कृत शिक्षिका,अयोध्या

संस्कृतसम्भाषणं किमर्थं आवश्यकम्? कस्य च कृते?

संस्कृतं केवलं पठने परीक्षायां च अङ्कप्राप्तये प्रयुक्ता भाषा नास्ति, अपितु संवादस्य अभिव्यक्तेश्च समर्था भाषा अस्ति। यदि संस्कृतं जनजनं प्रति नेतुम् इच्छामः, तर्हि संस्कृतसम्भाषणं दैनन्दिनजीवनेन सह सम्बद्धं करणीयम्। यदा वयं संस्कृतं वक्तुं प्रारभामहे, तदा भाषा केवलं पुस्तकपृष्ठेषु सीमिता न तिष्ठति, अपितु अस्माकं व्यवहारस्य जीवनस्य च अङ्गं भवति।

संस्कृतसम्भाषणं किमर्थम् आवश्यकम्?

संस्कृतभाषणेण भाषां प्रति संकोचः दूरीभवति तथा शब्दावल्याः, उच्चारणस्य वाक्यविन्यासस्य च व्यावहारिकः अभ्यासः भवति। संस्कृतं सम्भाषणमाध्यमेन अधीयमानेन विद्यार्थिनः भाषां अधिकं सहजतया अवगन्तुं शक्नुवन्ति। तेन संस्कृतसाहित्ये, भारतीयदर्शने, वेदेषु, उपनिषत्सु, आयुर्वेदे तथा अन्यासु भारतीयज्ञानपरम्परासु मूलभाषया अवगन्तुं रुचिरपि वर्धते।

संस्कृतसम्भाषणं केषां कृते?

संस्कृतसम्भाषणं केवलं संस्कृतविद्यार्थिनां वा अध्यापकानां कृते नास्ति। विद्यार्थिनः, शिक्षकाः, अभिभावकाः, शोधार्थिनः, प्रतियोगितापरीक्षाणां सज्जतां कुर्वन्तः युवानः, संस्कृतप्रेमिणः तथा सामान्यजनाः अपि संस्कृतसम्भाषणम् अधिगन्तुं शक्नुवन्ति। येषां जनानां संस्कृताध्ययनस्य पूर्वानुभवः नास्ति, तेऽपि सरलवाक्यैः दैनन्दिनजीवनसम्बद्धैः संवादैश्च संस्कृतसम्भाषणस्य प्रारम्भं कर्तुं शक्नुवन्ति।विशेषतः बालकानां युवानां च कृते संस्कृतसम्भाषणम् अत्यन्तम् उपयोगि अस्ति, यतः सम्भाषणाभ्यासेन तेषु भाषाध्ययनस्य आत्मविश्वासः वर्धते। शिक्षकानां कृते एतत् कक्षां अधिकं संवादात्मकां कर्तुं सहायकरं भवति, सामान्यजनानां कृते च भारतीयसंस्कृतेः परम्परायाश्च सह सम्बद्धतायाः सरलतमं माध्यमं भवितुम् अर्हति।अद्य आवश्यकता अस्ति यत् संस्कृतं केवलं विषयत्वेन न पश्येम, अपितु तां भाषणस्य, श्रवणस्य, अवबोधनस्य व्यवहारस्य च भाषा कुर्याम। संस्कृतसम्भाषणस्य लघुः प्रारम्भोऽपि संस्कृतस्य व्यापकप्रचार-प्रसारस्य दिशि महत्त्वपूर्णं पदं भवितुम् अर्हति।



हिमसंस्कृतवार्ता
डॉ. वर्षा प्रकाश टोणगांवकर
लेखिका, पुणे (महाराष्ट्रम्)

"ज्ञानप्रज्ञायोः भेदः"

'ज्ञानम्'- पशूनां पक्षीणां च लघुतमानां प्राणिनाम् अपि ज्ञानम् अस्ति। खादनं- पानं, श्वसनम्, उत्थानम्, उपविष्टं, गमनं, परिभ्रमणं, प्रसवः, स्व-अनस्मदीयम् इत्यादयः ज्ञानं सर्वेषु जीवेषु भवन्ति।

'प्रज्ञा'- चिन्तनस्य अवगमनस्य च शक्तिः प्रज्ञा इति कथ्यते। विशिष्टा बुद्ध्याः नाम विवेकः इति। विवेकद्वारा एव मनुष्याः सूचीतः पोतपर्यन्तं सर्वं निर्मायन्ति। स्वस्य शुभाशुभं ज्ञात्वा, पाप-पुण्यं ज्ञात्वा, इहपरलोकं च ज्ञानं सर्वाणि कार्याणि प्रज्ञा एव करोति। एतादृशी ज्ञानं केवलं मनुष्याणां एव सन्ति/ भवन्ति। एषा प्रज्ञायाः व्यापकः परिभाषा अस्ति। एषःच ज्ञानप्रज्ञायोः भेदः।

"अद्भिः गात्राणि शुध्यन्ति मनः सत्येन शुध्यति।
विद्यातपोभ्यां भूतात्मा बुद्धिर्ज्ञानम्पर्नेन शुध्यति।।"



हिमसंस्कृतवार्ताः, ईदरधीरजः

वार्तासंवादः

नन्दिनी- नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं व्याहरामि। नमस्ते काव्ये।

काव्या- नमस्ते नन्दिनि। अद्य मया काश्चन अतीव विचित्राः वार्ताः सङ्कलिताः। प्रथमं तु, चीनदेशे यात्रिभिः एकः नूतनः उपायः कृतः। यत्र यत्र प्रकोष्ठे मत्कुणाः दृष्टाः, तत्र जालपुटे तैः चिह्नं कृतम्। एतत् मानचित्रं बहु प्रसिद्धं जातम्।

नन्दिनी- अहो! मत्कुणेभ्यः रक्षणाय सः उपायः अतीव विचित्रः किन्तु उत्तमः जातः! द्वितीया वार्ता का?

काव्या- क्यालिफोर्नियानगरे एका धावनप्रतियोगिता आयोजिता। तत्र एकोनविंशतिः धावकाः धावनसमये अकस्मात् रुग्णाः जाताः। ते सत्वरं चिकित्सालयं नीताः। एतस्य रहस्यमयरोगस्य कारणं रक्षकैः स्वास्थ्य-अधिकारिभिः च अन्विष्टम्।

नन्दिनी- कियत् कष्टप्रदम्! सा अस्वस्थता तु अतीव चिन्ताजनिका सञ्जाता। अन्या वार्ता का?

काव्या- 'एन्वीडिया' संस्थायाः विषये एका वार्ता मया पठिता। तस्याः मुख्य-अधिकारी जेन्सेन हुवान्गः। केनचित् विदेशीयेन गुप्तचरेण तस्योपरि लक्ष्यं कृतम् इति वार्ता सर्वत्र प्रसृता। अतः संस्थायाः समित्या एकम् अन्वेषणम् आरब्धम्। तेन कारणेन विपण्यां बहु-धनस्य हानिः जाता।

नन्दिनी- सा वार्ता तु चलच्चित्रस्य कथा इव श्रुता! विपण्याम् अपि महान् कोलाहलः जातः। अन्तिमा वार्ता का?

काव्या- अमेरिकादेशस्य इडाहो-राज्ये एका भयङ्करी घटना सञ्जाता। एकः पञ्चदश-वर्षीयः बालकः परिहासार्थं कस्यचित् गृहस्य द्वार-घण्टिकां वादयित्वा धावितः। कुपितेन गृहस्वामिना तस्योपरि अग्न्यस्त्रेण प्रहारः कृतः। ततः सः गृहस्वामी रक्षकैः बद्धः।

नन्दिनी- हा कष्टम्! सामान्यायै क्रीडायै अपि तादृशः भयङ्करः क्रोधः जातः! एताः सर्वाः वार्ताः अतीव विचित्राः। एतासां वार्तानां कृते कृतज्ञताम् अर्पयामि तुभ्यम्।

काव्या- स्वागतं नन्दिनि! शुभदिनम्।



हरियाणा-विधानसभायां मिथिला-विश्वविद्यालयस्य राष्ट्रिय-सेवा-योजनायाः स्वयंसेवकस्य अक्षयकुमारझा इत्यस्य तर्कपूर्णा वाणी गुंजिता, श्रेष्ठवक्तृषु सम्मानितः



हरियाणा-युवा-संवादः 4.0 इत्यस्मिन् 'नारीशक्ति-वन्दन-अधिनियमम्' अधिकृत्य विपक्षस्य पक्षतः अक्षयेन निर्भीकतया विचाराः प्रस्तुताः, विधानसभाध्यक्षेण हरविन्दरकल्याणेन सम्मानितः।

हिमसंस्कृतवार्ता - विश्व मोहन झा , दरभंगा । राजधानी-युवा-संसद्-संस्थया चण्डीगढ-नगरे स्थितायां हरियाणा-विधानसभायाम् आयोजिते 'हरियाणा-युवा-संवादः 4.0' इति कार्यक्रमे मनीगाछी-प्रखण्डस्य राजे-ग्रामनिवासी तथा ललितनारायण-मिथिला-विश्वविद्यालयस्य, दरभङ्गायाः राष्ट्रिय-सेवा-योजनायाः (NSS) स्वयंसेवकः अक्षयकुमारझा विपक्षस्य प्रतिनिधित्वं कुर्वन् सदनं सम्बोधितवान्। 'नारीशक्ति-वन्दन-अधिनियमम्' अधिकृत्य तेन प्रस्तुताः युक्तियुक्ताः विचाराः सर्वैः प्रशंसिताः। श्रेष्ठवक्तृषु स्थानं प्राप्तवान् सः विशेषसम्मानेन सम्मानितश्च अभवत्। स्वसम्बोधने अक्षयः अवदत् यत् मौलिकदृष्ट्या विचार्यमाणे देशे एतादृशस्य अधिनियमस्य आवश्यकता न प्रतीयते। तेन तर्कितं यत् यदि महिलाभ्यः त्रिंशत्-त्रयः प्रतिशतं स्थानानि आरक्षितानि क्रियन्ते, तर्हि भविष्ये दिव्याङ्गजनाः, स्वातन्त्र्यसङ्ग्रामस्य सेनानिनः, वरिष्ठनागरिकाः, वीरशहीदानां पत्न्यः तथा किन्नरसमुदायस्य सदस्याः अपि स्वकीयभागधेयस्य आग्रहं करिष्यन्ति। एवं स्थितौ स्वस्थलोकतन्त्रे योग्यप्रतिनिधीनां चयनस्य स्थाने केवलं आरक्षणस्य निर्धारितप्रतिशतस्य पूर्तये एव अधिकं महत्त्वं दीयमानं भविष्यति।तेन इदमपि प्रश्नितं यत् अधिनियमस्य कार्यान्वयने सति किं वास्तवमेव निर्धनमहिलाभ्यः अवसरः प्राप्स्यते? तस्य मते आरक्षितानि स्थानानि प्रभावशालिनां राजनैतिकपरिवाराणां स्नुषाः, भगिन्यः तथा अन्याः सम्बन्धिन्यः एव अधिकतया प्राप्नुयुः इति प्रबलाशङ्का वर्तते। अक्षयेन सुझावः प्रदत्तः यत् यदि महिलानां आर्थिकसशक्तीकरणाय विशेषप्रयत्नाः क्रियेरन्, तर्हि ताभ्यः विशेषसंरक्षणस्य अथवा प्रोत्साहनस्य आवश्यकता एव न भविष्यति।कार्यक्रमस्य अन्तर्गतं सायंकाले हरियाणा-विधानसभायाः अध्यक्षः श्रीमान् हरविन्दरकल्याणः अक्षयकुमारझा-सहितान् सर्वान् प्रतिभागिनः रात्रिभोजाय आमन्त्रितवान्। तत्र सर्वैः सह विचाराणाम् अनुभवानां च आदानप्रदानम् अपि अभवत्। अस्मिन्नेव अवसरे श्रीकल्याणस्य करकमलाभ्यां अक्षयः श्रेष्ठवक्तृसम्मानेन सम्मानितः।अस्मात् पूर्वम् अपि बिहार-विधानसभायाः राजस्थान-विधानसभायाश्च मञ्चयोः युवानां स्वरं बुलन्दीकृत्य स्वप्रतिभां प्रदर्शितवान् अक्षयः अस्याः उपलब्धेः कारणात् सम्पूर्णे विश्वविद्यालये मिथिलाञ्चले च हर्षोल्लासस्य वातावरणं वर्तते। अस्मिन् अवसरे विश्वविद्यालयस्य शिक्षकाः, मित्राणि, सम्बन्धिनः, प्रतिवेशिनः, परिचिताः तथा शुभचिन्तकाः तस्मै हार्दिकाः बधाइः शुभकामनाश्च प्रदत्तवन्तः।

श्रीमहालक्ष्मीपूजनकार्यक्रमे सहभागः, क्षेत्रस्य सुखसमृद्ध्यै च प्रार्थना।

हिमसंस्कृतवार्ताःवृजेश कुमार पाण्डेय सिद्धार्थनगरम्। डुमरियागञ्जविधानसभाक्षेत्रस्य नगरपञ्चायतस्य बढ़नीचाफा-नगरस्य कृष्णानगर-प्रभागे आयोजिते श्रीमहालक्ष्मीपूजनकार्यक्रमे सम्मिलितः भूत्वा श्रीमहालक्ष्म्याः दर्शनं कृत्वा आशीर्वादं प्राप्तवान्। अस्मिन् अवसरे क्षेत्रवासिनां सुखसमृद्धेः, सुखशान्तेः, कल्याणस्य च कामना कृता तथा क्षेत्रस्य सर्वाङ्गीणविकासाय प्रार्थना विहिता।अस्मिन् धार्मिककार्यक्रमे मित्रसङ्घस्य वरिष्ठनेता श्रीराय अकुरमः, वरिष्ठभाजपानेता श्रीरमेशपाण्डेयः, मित्रसङ्घस्य सक्रियकार्यकर्ता श्रीसाहबपाण्डेयः, मित्रसङ्घस्य क्षेत्रप्रभारी श्रीदीपकजयसवालः, सञ्चारमाध्यमप्रभारी श्रीअभिषेकहिन्दुस्तानी च अन्ये गणमान्यजनाः उपस्थिताः आसन्।



पाहड़ी माहणुआं तू कंह ज़ुल्म कमायादा

पाहड़ी माहणुआं तू एह क्या ज़ुल्म कमायादा
पाहड़िया जो छड्डी कने तूं कहँ दूर जायादा
असांरे सारे बुज़ुर्ग बी पाहड़िया च ई थे गलांदे
तिन्हांरिया विरास्ता जो तूं कहँ अग्गे नी बधायादा

छोटे छोटे बच्चेयाँ जो अंग्रेज़ी सिखायादा
उमरां रे चलिरे सैजे संस्कार तिन्हांजो भुलायादा
सबीं बुज़ुर्गे निभाये अपणे रीति रिवाज
तू कहँ इन्हां रीति रिवाजां ते पीछा छुड़ायादा

स्याणे म्हारे अज्ज बी पाहड़ी ई गलायादे
पाहड़ी तिन्हांरा रहन सहन पाहड़ी खाणा खायादे
पढ़े लिखे पांवें अये घट पर बौहत आ दिमाग
पाहड़िया च गलाई कने बड़ेयाँ बड़ेयाँ जो बी समझायादे

पाहड़ी म्हारी इतनी मीठी कने प्यारी
भूलणे लगिरे इसाजो मत गईरी मारी
अपणी बोली बोली कने ई ह्युन्दी तरक्की
हऊँ नी बोल्दा एह दुनियां ग्लान्दी सारी

पंजाबी लोग पंजाबी जम्मू वाले डोगरी गलांदे
असें पाहड़ी माहणू पाहड़ी बोलने ते कहँ शर्मान्दे
अंग्रेज़िया रे फेरा च फसी गई दुनियां सारी
देखा देखिया रे गेड़ा च पाहड़ी बी आई जांदे

तुहें अपणेयां बच्चेयाँ जो पांवें हिंदी अंग्रेज़ी दोनों पढ़ाओ
पर सौगी सौगी छोटी बहन पाहड़िया जो भी चलाओ
बेशक नौकरिया खातर अंग्रेज़ी अई बड़ी जरूरी
जे मुयो बाहर नी गलाई सकदे तां अप्पू चियें तां गलाओ

अंग्रेज़ी हिंदी हौले़यां हौले़यां अग्गे बधी जांदी
लोकां रा रवैया देखी कने पाहड़ी बड़ी घबरान्दी
पता नी काहलूं जे छडी देने इसा अपने प्राण
मरने नी देवा मिंजो बार बार एहड़ी.मिनतां करी जांदी



रवींद्र कुमार शर्मा,
घुमारवीं
जिला बिलासपुर
हि प्र
7018853800

भ्रातृद्वितीया पर्वसमीक्षा



- डॉ विमलेश झा,
रमेश कुंज,गंगौली,सरिसबपाही, मधुबनी,

बिहारभारतीयसंस्कृतिः विविधैः पर्वभिः, उत्सवैः, धार्मिकपरम्पराभिः च समृद्धा अस्ति। अस्माकं देशे प्रतिवर्षं विविधाः उत्सवाः श्रद्धया, भक्त्या, हर्षोल्लासेन च आचर्यन्ते। एते उत्सवाः न केवलं धार्मिकदृष्ट्या महत्त्वपूर्णाः सन्ति, अपि तु सामाजिकसम्बन्धानां सुदृढीकरणे, पारिवारिकैकतायाः स्थापनायां, मानवीयमूल्यानां संवर्धने च महत्त्वपूर्णां भूमिकां निर्वहन्ति। भारतीयपर्वसु भ्रातृद्वितीयापर्व विशेषमहत्त्वं धारयति। इदं पर्व भ्रातुः भगिन्याः च पवित्रप्रेम्णः, स्नेहस्य, विश्वासस्य, आत्मीयतायाः च प्रतीकम् अस्ति। भ्रातृद्वितीयापर्व दीपावलीमहोत्सवस्य अनन्तरं कार्तिकमासस्य शुक्लपक्षस्य द्वितीयायां तिथौ आचर्यते। अयं दिवसः यमद्वितीया, भ्रातृद्वितीया, भैयादूज इत्यादिभिः नामभिः अपि प्रसिद्धः अस्ति। अस्मिन् दिने भगिन्यः स्वभ्रातॄणां मङ्गलकामनां कुर्वन्ति, तेषां दीर्घायुष्यस्य, आरोग्यस्य, सुखसमृद्धेः च प्रार्थनां कुर्वन्ति। भ्रातरः अपि स्वभगिनीभ्यः स्नेहं, सम्मानं, संरक्षणस्य आश्वासनं च ददति। भ्रातृद्वितीयापर्वणः सम्बन्धे विविधाः पौराणिककथाः प्रचलिताः सन्ति। तासु यमराजस्य यमुनायाः च कथा अत्यन्तं प्रसिद्धा अस्ति। पुरा सूर्यदेवस्य पुत्रः यमराजः मृत्युलोकस्य अधिपतिः आसीत्। तस्य भगिनी यमुना नदी आसीत्। यमुना स्वभ्रातरं यमराजं प्रति अत्यन्तं स्नेहं धारयति स्म। सा बहुवारं स्वभ्रातरं स्वगृहे भोजनाय आमन्त्रयति स्म, किन्तु कार्यव्यस्ततया यमराजः तस्याः निमन्त्रणं स्वीकर्तुं न शक्नोति स्म।एकदा कार्तिकमासस्य शुक्लपक्षस्य द्वितीयायां तिथौ यमराजः स्वभगिन्याः यमुनायाः गृहम् आगच्छत्। यमुना तस्य स्वागतं भक्तिपूर्वकं कृतवती। सा भ्रातरं तिलकं कृत्वा, आरतीं कृत्वा, स्वादिष्टं भोजनं च समर्पितवती। भ्राता भगिन्याः प्रेम्णा अत्यन्तं प्रसन्नः अभवत्। ततः यमराजः भगिनीं वरं याचितुं प्रार्थितवान्। यमुना अवदत्- "हे भ्रातः! प्रतिवर्षम् अस्मिन् पवित्रे दिने यः भ्राता स्वभगिन्याः गृहे भोजनं करिष्यति, भगिन्याः स्नेहं च स्वीकरिष्यति, तस्य आयुः, आरोग्यं, सौभाग्यं च वर्धताम्।"यमराजः तस्याः प्रार्थनां स्वीकृतवान्। तदा सः वरं दत्तवान् यत् अस्मिन् दिने भगिन्याः हस्तेन तिलकं धारयन्, तस्याः स्नेहं च प्राप्नुवन् भ्राता दीर्घायुः, सुखी च भवेत्। ततः प्रभृति अयं दिवसः यमद्वितीया इति नाम्ना प्रसिद्धः अभवत्। जनाः अस्मिन् दिने भगिनीभिः सह भ्रातृप्रेम्णः उत्सवं श्रद्धया आचरन्ति।

श्रीकृष्णस्य सुभद्रायाः च कथा

भ्रातृद्वितीयापर्वणः सम्बन्धे श्रीकृष्णस्य भगिन्याः सुभद्रायाः कथा अपि प्रचलिता अस्ति। पौराणिक-परम्परानुसारं नरकासुरस्य वधानन्तरं भगवान् श्रीकृष्णः स्वभगिन्याः सुभद्रायाः समीपम् आगतवान्। सुभद्रा तस्य स्वागतं कृत्वा तिलकं, आरतीं, पुष्पमालां च समर्पितवती। सा भ्रातुः मङ्गलं प्रार्थितवती। तयोः मध्ये विद्यमानः स्नेहः भ्रातृभगिन्योः सम्बन्धस्य आदर्शरूपेण वर्णितः अस्ति। एताभिः कथाभिः स्पष्टं भवति यत् भ्रातृद्वितीयापर्व केवलं धार्मिकः उत्सवः नास्ति, अपितु प्रेम्णः, त्यागस्य, विश्वासस्य, पारिवारिक-सम्बन्धस्य च उत्सवः अस्ति।

भ्रातृद्वितीयापर्वणः आचरणं भारतीयपरम्परायां विशेषं स्थानं धारयति। अस्मिन् दिने भगिन्यः प्रातःकाले स्नानं कृत्वा स्वगृहं स्वच्छं कुर्वन्ति। पूजास्थले दीपं प्रज्वालयन्ति, देवतानां पूजनं च कुर्वन्ति। ततः स्वभ्रातॄणां स्वागताय विविधानि मङ्गलद्रव्याणि सज्जीकुर्वन्ति। भगिनी भ्रातरं स्वगृहे आमन्त्रयति। तस्य ललाटे रोचनया अथवा कुमकुमेन तिलकं करोति। अक्षतान् स्थापयति, पुष्पाणि समर्पयति, दीपेन आरतीं च करोति। ततः भगिनी भ्रातुः दीर्घायुष्याय, आरोग्याय, सुखसमृद्धये च प्रार्थनां करोति। अस्मिन् दिने भगिनी स्वहस्तेन भ्रातुः कृते स्वादिष्टानि भोजनानि निर्माति। विविधाः मिष्टान्नानि, पक्वान्नानि, फलानि च समर्पयति। भ्राता अपि भगिन्यै वस्त्राणि, आभूषणानि, मिष्टान्नानि अथवा अन्यानि उपहाराणि ददाति। सः भगिन्याः सुखदुःखयोः सहायतां कर्तुं प्रतिज्ञां करोति।एवं भ्रातृद्वितीयापर्वणः आचरणेन भ्रातुः भगिन्याः च सम्बन्धः अधिकं सुदृढः भवति। भ्रातृभगिन्योः सम्बन्धः भारतीयपरिवारव्यवस्थायाः महत्त्वपूर्णः आधारः अस्ति। भ्राता भगिन्याः रक्षकः, सहायकः, मित्रं च भवति। भगिनी अपि भ्रातुः जीवनस्य सुखदुःखयोः सहभागिनी भवति। तयोः सम्बन्धे प्रेम, विश्वासः, त्यागः, सहयोगः, आत्मीयता च निहिताः भवन्ति। बाल्यावस्थायां भ्रातरौ भगिन्यौ एकत्र क्रीडतः, अध्ययनं कुरुतः, सुखदुःखानि अनुभवन्ति च। कदाचित् तयोः मध्ये विवादाः अपि भवन्ति, किन्तु स्नेहस्य प्रभावेण ते विवादाः शीघ्रमेव समाप्ताः भवन्ति। कालक्रमेण भ्रातरः भगिन्यः च स्वस्वजीवने व्यस्ताः भवन्ति। विवाहानन्तरं भगिनी अन्यस्मिन् गृहे निवसति, भ्राता अपि स्वकर्तव्येषु संलग्नः भवति। तथापि तयोः सम्बन्धः कदापि समाप्तः न भवति। भ्रातृद्वितीयापर्व तयोः पुनर्मिलनस्य, प्रेम्णः नवीकरणस्य, पारिवारिकैकतायाः च अवसरं प्रददाति। भारतीयसमाजे पर्वाणि सामाजिक-समरसतायाः संवर्धनस्य महत्त्वपूर्णानि साधनानि सन्ति। भ्रातृद्वितीयापर्व अपि समाजे प्रेम्णः, सद्भावस्य, सहयोगस्य च भावनां प्रसारयति।इदं पर्वः परिवारस्य सदस्येषु परस्परं सम्मानं, सहानुभूतिम्, उत्तरदायित्वभावं च जागरयति। भगिनी भ्रातुः मङ्गलं कामयते, भ्राता भगिन्याः सम्मानं रक्षणं च करोति। एतेन समाजे स्त्रीपुरुषयोः परस्परपूरकत्वस्य भावना विकसित भवति। अस्मिन् पर्वणि केवलं रक्तसम्बन्धिनः एव न, अपि तु स्नेहसम्बन्धिनः अपि परस्परं शुभकामनाः यच्छन्ति। येषां भगिन्यः न सन्ति, ते अपि स्वमित्राणां भगिनीभिः सह अस्य पर्वणः आनन्दं अनुभवन्ति। एतादृशः व्यवहारः समाजे आत्मीयतां विस्तारयति। आधुनिकयुगे मानवजीवनं अत्यन्तं व्यस्तं जातम्। जनाः शिक्षायाः, व्यवसायस्य, आर्थिकोपार्जनस्य च कारणेन स्वपरिवारात् दूरं निवसन्ति। अनेकाः भगिन्यः विदेशेषु अथवा अन्येषु नगरेषु निवसन्ति। भ्रातरः अपि स्वकार्येषु व्यस्ताः भवन्ति।

एतादृश्यां परिस्थितौ भ्रातृद्वितीयापर्वणः महत्त्वं अधिकं वर्धते। अयं दिवसः परिवारस्य सदस्येभ्यः परस्परं मिलितुं, प्रेम्णः आदानप्रदानं कर्तुं, सम्बन्धानां पुनः सुदृढीकरणाय च अवसरं ददाति।

यदि भ्राता भगिन्या सह प्रत्यक्षं मिलितुं न शक्नोति, तर्हि दूरभाषमाध्यमेन, सन्देशेन, दृश्यसम्भाषणेन वा शुभकामनाः प्रेषयितुं शक्नोति। पर्वणः वास्तविकं महत्त्वं उपहारस्य मूल्ये न, अपि तु हृदयस्य भावनायां निहितम् अस्ति। अद्यतनसमाजे भ्रातृद्वितीयापर्वणः माध्यमेन बालकेभ्यः पारिवारिकमूल्यानां, संस्काराणां, परस्परं सम्मानस्य च शिक्षां दातुं शक्यते। एतेन भाविनि समाजे प्रेम्णः, सहयोगस्य, उत्तरदायित्वस्य च भावना दृढा भविष्यति। अपि च भ्रातृद्वितीयापर्व नारीसम्मानस्य महत्त्वपूर्णं सन्देशं ददाति। भगिनी केवलं भ्रातुः संरक्षणस्य अपेक्षां न करोति, अपि तु सा स्वयम् अपि समर्था, स्वावलम्बिनी, प्रतिभाशालिनी च भवति। भ्रातुः कर्तव्यं केवलं भगिन्याः रक्षणं न, अपि तु तस्याः शिक्षायाः, स्वातन्त्र्यस्य, अधिकाराणां, सम्मानस्य च संरक्षणम् अपि अस्ति। भगिनी अपि भ्रातुः जीवनस्य मार्गदर्शिका, प्रेरणास्रोतः, हितैषिणी च भवितुम् अर्हति। अतः अस्मिन् पर्वणि भ्रातृभगिन्योः सम्बन्धः समानतायाः, परस्परं सम्मानस्य, सहयोगस्य च आदर्शं प्रस्तौति। वर्तमानकाले पर्यावरणसंरक्षणम् अपि अस्माकं महत्त्वपूर्णं कर्तव्यम् अस्ति। पर्वाणाम् आचरणे पर्यावरणस्य रक्षणं सर्वैः अवश्यं करणीयम्। भ्रातृद्वितीयापर्वणि प्राकृतिकपुष्पाणां, मृत्तिकादीपानां, पर्यावरणानुकूलानां पूजासामग्रीणां च उपयोगः करणीयः। प्लास्टिकेत्यस्य, रासायनिकवर्णानां, अपशिष्टपदार्थानां च प्रयोगः न्यूनीकर्तव्यः। अस्मिन् पर्वणि भगिन्यः भ्रातॄणां मङ्गलाय प्रार्थयन्ति। यदि ते पर्यावरणस्य संरक्षणस्य संकल्पं अपि गृह्णन्ति, तर्हि एषः उत्सवः अधिकः सार्थकः भविष्यति। स्वच्छं पर्यावरणं स्वस्थजीवनस्य आधारः अस्ति। भ्रातृद्वितीयापर्व भारतीयसंस्कृतेः गौरवपूर्णः उत्सवः अस्ति। अयं पर्वः भ्रातुः भगिन्याः च पवित्रसम्बन्धस्य, प्रेम्णः, विश्वासस्य, त्यागस्य, सहयोगस्य च प्रतीकः अस्ति। अस्मिन् दिने भगिनी भ्रातुः दीर्घायुष्यं, आरोग्यं, सुखसमृद्धिं च प्रार्थयति। भ्राता अपि भगिन्याः सम्मानं, सुखं, सुरक्षां च सुनिश्चितुं संकल्पं करोति। अस्य पर्वणः वास्तविकं महत्त्वं केवलं तिलके, आरत्यां, उपहारेषु वा निहितं नास्ति, अपि तु परस्परं प्रेम्णः, विश्वासस्य, आत्मीयतायाः च भावनायां निहितम् अस्ति।

अस्माभिः सर्वैः अस्य पर्वणः मूलभावनां स्वजीवने आत्मसात्कर्तव्यम्। भ्रातृभगिन्योः सम्बन्धः सदैव प्रेम्णा, सम्मानपूर्णेन व्यवहारेण, सहयोगेन च सुदृढः करणीयः। अतः भ्रातृद्वितीयापर्व केवलं धार्मिकः उत्सवः न, अपि तु पारिवारिकैकतायाः, सामाजिकसमरसतायाः, मानवीयमूल्यानां च महोत्सवः अस्ति। एतत् पर्व अस्मान् शिक्षयति यत् प्रेम, विश्वासः, त्यागः, सहयोगः च जीवनस्य वास्तविकानि धनानि सन्ति।भ्रातुः भगिन्याः च सम्बन्धः स्नेहस्य अमूल्यः बन्धः अस्ति। अस्य बन्धस्य संरक्षणं, संवर्धनं च अस्माकं सर्वेषां कर्तव्यम्। सर्वेभ्यः भ्रातृद्वितीयापर्वणः हार्दिक्यः शुभकामनाः। अस्मिन् पर्वणि भगिनी इमं मन्त्रं पठति-**भ्रातस्तवानुजाताहं भुङ्क्ष्व भक्तमिदं शुभम्।प्रीतये यमराजस्य यमुनायां विशेषतः॥**
भ्रातस्तवाग्रजाताहं भुङ्क्ष्व भक्तमिदं शुभम्।
प्रीतये यमराजस्य यमुनायां विशेषतः॥इत्यलम्।।

भारतीयसंस्कृतौ भ्रातृभगिन्योः प्रेम्णः पर्व भ्रातृद्वितीया



डा. लीलाधर वात्सायनः
सेवानिवृत्तः प्राचार्यः
राजकीय-नेहरू-संस्कृत-महाविद्यालयः,
फागली, शिमला (हिमाचलप्रदेशः)
हिमसंस्कृतवार्ता ९ नवम्बर २०२६

कार्तिकमासस्य शुक्लपक्षे द्वितीयायां तिथौ समागता इयं 'यमद्वितीया' अर्थात् 'भ्रातृ-द्वितीया' (भाई दूज) भारतीय-संस्कृतेः पवित्रेषु उत्सवेषु अन्यतमा वर्तते। भ्रातृ-भगिन्योः अगाध-स्नेहस्य, परस्पर-विश्वासस्य, सौहार्दस्य च प्रतीकभूतम् इदं पर्व पारिवारिकमूल्यानां संवर्धनं करोति।अस्मिन् मङ्गलमये दिने भगिनी यमुना स्वभ्रातरं यमराजं सस्नेहं स्वगृहम् आहूय भोजनं कारितवती, तस्मै शुभाशीर्वादं च दत्तवती इति पौराणिकी प्रसिद्धिः। तत एव परम्परानुसारं भगिन्यः भ्रातृणां ललाटे मङ्गलतिलकंविधाय तेषां दीर्घायुष्यार्थं, सुख-समृद्ध्यर्थं, यशोवृद्ध्यर्थं च भगवतः प्रार्थयन्ते। भ्रातरः अपि स्वभगिनीनां रक्षणस्य, सम्मानस्य, सदा सहयोगस्य च दृढसङ्कल्पं कुर्वन्ति।

यमयमुनाभ्रातृद्वितीयाकथा

कार्तिकमासस्य शुक्लपक्षस्य द्वितीयायां तिथौ भ्रातृद्वितीया (यमद्वितीया) इति उत्सवः सोत्साहं परिपाल्यते। अस्य पावनपर्वणः पौराणिकी कथा एवं वर्तते—

सूर्यदेवस्य भार्या संज्ञा आसीत्। तयोः यमराजः यमुना च इति द्वे सन्तती अजायेताम्। यमः धर्मराजः यमलोकस्य पालकः बभूव, यमुना च पृथिव्यां पुण्यसरित् रूपेण प्रावहत्। यमुना स्वभ्रातरि यमे अतीव स्निह्यति स्म। सा बहुधा यमराजम् स्वगृहम् आगत्य भोजनं कर्तुं प्रार्थयति स्म, किन्तु यमः स्वकार्येषु सर्वदा व्यस्तः सन् तत्र गन्तुं न अशक्नोत्।

एकदा कार्तिकशुक्लद्वितीयायां तिथौ यमुना स्वभ्रातरं यमं पुनः सस्नेहम् आमन्त्रितवती। तस्मिन् दिने यमराजः विचारितवान्—"अहं तु सर्वेषां प्राणानां हरणं करोमि, मां कोऽपि स्वगृहे आह्वयितुं न इच्छति। मम भगिनी यमुना तु मां सस्नेहं स्मरति, अतः मया तस्याः गृहं गन्तव्यमेव।"यमराजः स्वभगिन्याः यमुनायाः गृहं प्राविशत्। भ्रातरं दृष्ट्वा यमुना अतीव प्रसन्ना अभवत्। सा यमस्य पाद्य-अर्घ्यादिभिः सत्कारं कृतवती, तस्य भाले कुङ्कुमतिलकं च न्यधत्। ततः सा तस्मै मिष्टान्नानि, रुचिकराणि व्यञ्जनानि



च सादरं पर्यवेषयत्। यमुनायाः स्नेहेन, आतिथ्येन च यमराजः परमं परितोषम् अवाप।

प्रसन्नः यमराजः भगिनीम् अवदत्—"हे कल्याणि! अहं तव सत्कारेण अतीव सन्तुष्टः अस्मि। यत्किञ्चिद् वरं याचस्व, तत् तुभ्यं दास्यामि।"

यमुना विनयेन अभाषत—"हे भ्रातः! यदि भवान् मह्यं वरं दातुमिच्छति, तर्हि प्रतिवर्षम् अस्मिन् दिने भवान् मम गृहम् आगत्य भोजनं कुर्यात्। अपि च या भगिनी अस्मिन् तिथौ स्वभ्रातुः तिलकं कृत्वा तस्मै भोजनं दास्यति, तस्य भ्रातुः अकालमृत्योः भयः न भवेत्। तौ उभौ दीर्घायुषौ, सुखिनौ च भवेताम्।"

यमराजः "तथास्तु" इति उक्त्वा तां वरम् अयच्छत्, तस्मै अमूल्यानि वस्त्राणि भूषणानि च दत्त्वा यमलोकं प्रति न्यवर्तत।ततः प्रभृति एषा परम्परा लोके प्रवृत्ता। मन्यते यत् अस्मिन् दिने यः भ्राता स्वभगिन्याः हस्तेन भोजनं गृह्णाति, तस्य जीवनं सर्वदा मङ्गलमयं भवति, यमभयात् च मुक्तिः लभ्यते।

सर्वेभ्यः मंगलकामना

अस्य पावनपर्वणः सर्वेभ्यः हार्दिक्यः शुभाशंसाः मङ्गलकामनाश्च।









तिलकं, समर्पणम्, आशीषः च
भ्रातृद्वितीयायाः समृद्धा धार्मिकपरम्परा



कार्तिकमासस्य शुक्लपक्षस्य द्वितीयायां तिथौ आचर्यमाणं भ्रातृद्वितीयापर्व (यमद्वितीया) भारतीयसनातनसंस्कृतेः अतीव पावनम्, आत्मीयञ्च पर्व वर्तते। दीपोत्सवस्य पञ्चदिवसीय-शृङ्खलायाः इदम् अन्तिमं पर्व रक्तसम्बन्धानां मर्यादायाः, निःस्वार्थस्नेहस्य, आध्यात्मिक-सङ्कल्पानां च प्रत्यक्षं प्रतीकम् अस्ति। एषः केवलं सामाजिकः आचारः नास्ति, अपितु तिलकस्य गरिमायाः, भगिन्याः समर्पणस्य, ईश्वरस्य च अनुग्रहस्य पावनः सङ्गमः अस्ति।

भाले तिलकम्-: रक्षायाः, सम्मानस्य, मङ्गलकामनायाः च प्रतीकम्

भ्रातृद्वितीयानुष्ठानस्य मुख्यं केन्द्रं भगिन्या स्वभ्रातुः मस्तके क्रियमाणं तिलकमस्ति।

आज्ञाचक्रस्य जागरणम्: मस्तकस्य मध्ये, भ्रुवोः अन्तराले स्थिते आज्ञाचक्रे यदा कुङ्कुमस्य, चन्दनस्य, अक्षतानां च लेपः क्रियते, तदा एतत् भ्रातुः आत्मबलं, विवेकं, सकारात्मकताञ्च जागरयति।

अक्षतानां महत्त्वम्: तिलकेन सह समर्पिताः अक्षताः जीवनस्य पूर्णतायाः, स्वास्थ्यस्य, अखण्डसौभाग्यस्य च सूचकाः सन्ति।

आरतीविधानम् -भगिनी भ्रातुः आरतीं कृत्वा तस्य जीवनात् सर्वाः बाधाः, दोषाः, नकारात्मकाः शक्तीः च नाशयितुं प्रार्थयते। एतत् तिलकम् केवलं वर्णात्मकं चिह्नं न, अपितु भ्रातुः सुरक्षायै कृता आध्यात्मिकी रक्षा-रेखा अस्ति।

समर्पणभावः-भगिन्याः निःस्वार्थं वात्सल्यम्

अस्य उत्सवस्य आत्मा भगिन्याः निःस्वार्थे भावे तिष्ठति। सनातनपरम्परायां भगिनी केवलं सोदरा न, अपितु गृहलक्ष्मीः, आदिशक्तेः सौम्यं रूपं च मन्यते। भ्रातृद्वितीयायां भगिन्यः प्रातःकालात् व्रतम् आचर्य स्वभ्रातुः दीर्घायुषे, यशसे, समृद्धये च ईशं प्रार्थयन्ते। ताः स्वयं कष्टं सोढ्वापि भ्रातुः कल्याणाय तपः कुर्वन्ति। शास्त्रेषु अयं "स्नेहयज्ञः" इत्युक्तः, यत्र भगिनी स्वकीयमहङ्कारं विस्मृत्य भ्रातुः मङ्गलाय सर्वं समर्पयति। भ्रातरं प्रति एषा श्रद्धा पारिवारिकसम्बन्धेषु अलौकिकां दृढतां ददाति।

आशीषः दायित्वं च: भ्रातुः कर्तव्यबोधः

तिलकस्य समर्पणस्य च प्रत्युत्तरे भ्राता स्वभगिन्याः चरणौ स्पृष्ट्वा तस्याः आशीर्वादान् गृह्णाति, तस्यै उपहारं रक्षणवचनं च प्रयच्छति। अयं विनिमयः केवलं भौतिकोपहाराणां न भवति। भगिन्याः आशीषः यत्र भ्रातरं जीवने विजेतुं शक्तिं ददाति, तत्रैव भ्रात्रा समर्पितः आदरः इदं स्मारयति यत् सः सर्वदा स्वभगिन्याः गरिमायाः, स्वाभिमानस्य, अधिकाराणां च सजगः रक्षकः भविष्यति। एषा परम्परा सम्बन्धेषु परस्परसम्मानस्य भावं पोषयति।

सर्वेभ्यः देशवासिभ्यः
भ्रातृद्वितीयापर्वणः
मङ्गलकामना

श्रीमान् अनिल कुमार गिरि
प्रतिष्ठित समाजसेवी वाराणसी

